नं०: ८२ - घ

वैयाकरण भूषणसारटीका

लघुभूषण कान्तिः' (अपूर्ण)

पत्राणि ४१

© Dharmartha Trust J&K. Digitized by eGangotri

नं० ८२-घ

वैयाकरण भूषणसारटीका

'लघुभूषणकान्तिः'

(अपूर्ण)

पत्राणि ४१

© Dharmartha Trust J&K. Digitized by eGangotri

व्याकरण लघुसूत्र[illegible]

१४०

कल्पा १५

© Dharmartha Trust J&K. Digitized by eGangotri

सं.भू.टी श्रीगणेशाय नमः ॥ नमःकृत्य गुणाध्यक्षं नृसिंहं कमलायुतं बुद्धिप्रभावर्द्धयित्रीं सं
१ हर्त्रीं दुरितस्य च १ संपादयित्रीं कामानां त्रायपित्रीं श्रियः श्रियम् तातं शंभुं सतीं दु
र्गाम्याणिनि प्रभृतीन् मुनीन् २ बालं भट्टाभिधं चापगुरुं पापरं गुरुं गोपालदे
वनामा सौपरिडिनो वालबुद्धये ३ कृष्णदेवानुजो लोके मनुदेवापराभिधः अनुस्मृ
त्य पंचाध्यायानां लेशतस्तथा ४ लघुनो भूषणस्येमां कान्तिं वितनुते सुधीः श्रीरसि शि वः
नयति वन्ध्य कृड्यरितो परामनाय शिष्य शिक्षायै व्याख्यातश्चान्तर्णामत्तु षड्‌ तोमङ्ग १
लापव समुचित देवतानसात्मकं मङ्गलमुपनिबध्नाति श्रीलक्ष्मीति हृपिणमिति

© Dharmartha Trust J&K. Digitized by eGangotri

न्यथा न वापि कृतिः पाचको देवदत्त इत्यादौ लक्षणापत्तेः एतेन भावनायां वाच्यत्वे विनिगमनाविरहप्रसक्तौ लाघवा
त्कर्तृपदस्योक्तरीत्या कृतिपरत्वं विनिगमकमिति तदुक्तमपास्तं। तिङ्भ्यो ऽव्ययमभिधीयत इत्युक्तभावितो धेन त
न्यायस्य सार्वत्रिकत्वात् कर्तृकरणयोरित्यादौ तृतीयाभिधायके कर्तृपदस्य तथात्वेपि कर्मकर्त्तर्यादित्यादौ तस्य
तस्य तथात्वे प्रमाणाभावाच्च न त्वाकृतिपदार्थस्य द्रव्यं न पदार्थ इत्यादिभाष्यप्रामाण्येन विशिष्टस्यैव वाच्यत्वेति
दिक्। कटादिवदिति। कटादौ भावनायथा सिध्यते कर्त्ता न तथाहाप्यत्तिति भावः।। श्री:। शंकते। तथापीति।। आ
क्षेपलभ्यत्वे सतीत्यर्थः। न स्यादिति। आक्षिप्तत्वात्। प्रत्ययार्थत्वाभावाच्चेति भावः। आक्षेपितव्यक्तेरिति। आक्षे
पितव्यक्तेरिति आकृत्यधिकरणे जातावेव शक्तिरिति नैः।। सिद्धान्तितत्वेन व्यक्ते राक्षेपेणैव बाधाङ्का कारादि
ति भावः। शंकते। पचतीति। कर्तुरपीति। पचतीस— पाकं करोती पाकं करा इत्यादिना विवरणात्। समुच्चयार्थेति।।

© Dharmartha Trust J&K. Digitized by eGangotri

भू० टी० धवखदिरावित्यादाव शब्दार्थसमुच्चयांशस्य धवश्च खदिरश्चेति चेन समविवरणं वदित्यर्थः। द्वैद्वीत्यैवेदं नतु
सिद्धान्तरीत्या। तत्र वृत्तौ एकार्थीभाव--- द्धान्तपिष्यमाणत्वेनाशब्दार्थत्वाभावादिति वोध्यम्। तन्न। विवर
णं। तुल्यत्वादिति। कर्तुः शब्दार्थविवरणे म्भावनायास्तावत्समानार्थविवरणमित्यस्यापि वक्तुं शक्यत्वेन तुल्यत्वादि
त्यर्थः। नन्वेवं सर्वत्र विवरणस्य शक्तिग्राहकत्वोच्छेदापत्तिरित्यस्यास्वरसादाह। किंत्वेति। अन्यथास्मिन्नपि पच
तीत्यति देवदत्तः पचतीति प्रयोगापत्तेः तच्चेति। तिङ्कर्तृवाचकत्वं साधकं समानविभक्तिकत्वरूपं समानाधि
करणमित्यर्थः। इत्यादिवित्तिनामधात्वोः राजपुरुषयोश्च निरुक्तसमानाधिकरण्यादिति भावः। रामेणेति। स
मानविभक्तिकत्वरूपसामानाधिकरण्यसत्वादित्यर्थस्तस्याभामार्थयोनेवा समानाधिकरणयोः इत्याक्षाभेदे
दातिरिक्तसंबन्धेनान्वयो नास्तीति पनेरभ्युपगन्तव्यमिति न कश्चिद्दोषः। लक्षणयेति। इदमुपलक्षणमास्ये

© Dharmartha Trust J&K. Digitized by eGangotri

पादे स्तथा च भावनास्ति स्वं कर्त्वा रमादाय सामानाधिकरण्योपपत्तेर्नैनत्साधकं कर्तृवाचकत्वे इति शङ्कार्थः। पिङ्गाक्ष्यादीति। पिङ्गे अक्षिणी यस्या इति षष्ठ्यन्ते न विग्रहे ऽनेकपदार्थे त्वनेन षष्ठ्यर्थे समानविधानात्। पिङ्गाक्षि सम्बन्ध इत्येवार्थः स्यादतो गवादिसामानाधिकरण्यानुपपत्तेः। संबन्धास्ति त्रसंबन्धा बहुव्रीहिसमासा र्थ इत्यत्र तत्समानाधिकरणा स्थितसिद्धान्तासङ्गतिः। संबन्धवाचकेन लक्षणया सम्बन्धि निमाहायैव सामाना धिकरण्योपपत्तेरिति भावः। षष्ठ्यर्थ एवेति। अन्यपदार्थे इत्यत्र सुप्तिङ्। सांपदेशच मत्स पार्थस्य प्राधान्यन्त था चान्यपदार्थे इत्यस्य पदजन्यप्रतीतिविशेष्यार्थे वर्तिपदार्थभिन्ने इत्यर्थेन बहुव्रीहिः संबन्धार्थकत्व मनुशासनतो लभ्यते इति भावः। द्व्यानुकेरिति। अयं चोक्षेतापत्तौ हेतुः। आनुरूप्यस्येति। तन्मते जातिरेव शब्दा र्थत्वात्॥ यान्तं इत्येपि। गवि ऽऽ नीता। संबंधिन आक्षेपेण। इति प्रपञ्चितमिति भावनायास्ति ऽ थत्वे तिङाक

© Dharmartha Trust J&K. Digitized by eGangotri

भू०टी० नुरनभिहितत्वेन पचतीति चैत्रेणेति कर्त्तरि तृतीयापत्तिः । न च लः कर्मणीति स्मृतिविनीधवानणापत्तेः कर्मणी
त्यस्यघ्येकयोरित्यनेनैकवाक्यतया कर्तृगतएकत्वे लकारो भवतीत्यर्थेनानभिहितेइत्यस्याप्रवृत्ता वेकत्वस्या
भिधानात्तृतीयावारणमिति वाच्यं । एकवचनादिसंज्ञाया आदेशनिष्ठत्वेन लकारे तदभावे नोक्तस्यैकवाक्य
तासंभवात् । एवं च देवदत्तहस्तोहेशत्रादिनापि शत्रादिनापि सरव्याभिधानापत्तेश्च । तिप्रदुनीइत्यनेनैक
वाक्यत्वेपि तत्संघर्थबोधकपदाभावात् । त्रयाणामेकवाक्यतयोक्तरीत्यावारणमिति चेन्न : एवमपि कान्तदिव
दत्तहस्याद्देस्तृतीयापत्तेः न चानभिहितेइत्यस्यावोधिनेकर्त्राद्यावित्यर्थः । बोधश्च कर्त्रादेः इत्यस्यैकवा
तिङ्ः आक्षेपादिति । नोक्तदोषावकाश इति वाच्यम् । शाब्दपामित्यनुभवविरोधेनापेक्षस्यैवायुक्तत्वात् ।
आक्षिप्तेः शाब्दे शाब्दसहस्यान्वयायोगाच्च । आक्षेपस्यापि सर्वविधस्य दूषणे पिष्यमाणत्वाच्च । न चान

© Dharmartha Trust J&K. Digitized by eGangotri

भिहितेइत्यनेनध्वसनेभिधानम्विवक्ष्यतेइतिवाच्यं।कर्त्तरिइत्यादिसूत्रधात्वर्थपरत्वेऽपिकर्तृकारणयोरित्य
त्रकर्तृपदस्यतत्परत्वेमानाभावात्·एतेनैरतभिहितेइत्यनेनान्वयायोगाच्च।तस्मात्भावनायाःतिङर्थत्वे
उक्तात्तृतीयापत्तिर्दुर्वारेत्यपिबोध्यम्।इदंवाचकत्वाभिधानं।मूलेफलेसमम्प्रयोनिरूपितत्वं
तदाह·फलंप्रतीति।एतच्चकर्तृप्रत्ययसमभिव्याहारे।कर्मप्रत्ययसमभिव्याहारेइत्यादौ—कव्यापारंप्रति
फलस्यैवप्राधान्यस्यवक्ष्यमाणत्वात्·।एतदर्थमेवफलव्यापारयोःपृथक्शक्तिरुक्ताननुफलावच्छि
न्नेव्यापारेइतिनिरूपितप्रागितिबोध्यम्·कर्तृएति·वचनव्यत्ययेनविशेषणमित्यनुषज्यते·एवमग्रेऽपि
समानप्रत्ययन्यायोपात्तत्वात्स्वादिति·अनेनशाब्दान्ततानुसंधानप्रयुक्तंलाघवंसूचितं।तः कर्मणि
निम्नसप्तिकद्व्येकयोरित्सेनेतेषांपदैकवाच्यतयेकत्वादिविशिष्टकर्त्रादेःतद्विधानादित्यपिबोध्यम्·तथा

© Dharmartha Trust J&K. Digitized by eGangotri

ल॰भू॰टी॰ चेति॰ कर्त्राद्युपस्थितिर्विशेष्यतासंबन्धे यत्र कर्त्रादौ तत्र प्रकारतया संख्याबोध इति भावः। इत एव विशे
3 षणत्वघटितवृत्ति॰ तथा चेति नुक्तबोधं प्रति इतराविशेषणीभूतप्रथमान्तपदजन्योपस्थितिर्हेतुरित्येवं वाच्य
मित्यर्थः। चन्द्र इवेत्यादाविवशब्दार्थे सादृश्ये प्रतियोगितया चन्द्रस्य देवदत्तपदार्थैकार्थस्य विशेषण
त्वान्नाख्यातार्थसङ्ख्यान्वय अपि तु मुखे देवदत्तयोनैवेति भावः। अ– संतत्वं निपातार्थत्वादेव स्यामः।
देवदत्तौ भुक्त्वा व्रजतीत्यादौ चन्द्रत्वार्थयोराख्यातार्थानन्वयादितराविशेषणत्वघटितवृत्त्यसत्तेर्गौरवम्॰
इदमपि। उक्तविशेषणानि विशेषप्रयुक्तत्वाघवमपि। वस्तुतो लकारानाः कर्मादौ भवन्ति तेषां च स्थाने एक
त्वादेति वादपरत्वेवं तृप्ययोरन्तः कर्मणीन्यादेर्वोक्ते कवाचपतयाऽन्वयः। न हि तत्र द्वितीयं कर्मणीत्यादि
पदमस्ति यस्य संख्यां विशेषणं स्यात्तु॰ आख्यातोनं मानं न स्यात्संख्याया धात्वर्थ एवान्वयः एकत्वादेरिति

© Dharmartha Trust J&K. Digitized by eGangotri

वाद्यइत्युक्ते कस्येत्याकाङ्क्षायामुपस्थितप्रकृत्यर्थस्यैवान्वयौचित्यात् ० सुप्विषये प्रातिपदिकार्थगतै
कत्वाद्यविस्यान्वयस्याक्षमत्वात् · नेनैकत्वपनात्र्चसम्बध्यते · कर्मणएकत्वे द्वितीयेति भाष्यविरोधस्तु न ·
कर्मत्वशक्तिसत्वेन प्रातिप्रातिपदिकार्थस्यैव कर्मपदबोध्यत्वात् · विधेयविभक्तिमत्तिकर्मणोगुणत्वेन गु
णानाञ्च परार्थत्वादितिन्यायेन कर्मगतैकत्वाद्यन्वयासंभवाच्च · क्रियायांस्वप्रकृतिकप्रत्ययवाच्यसा
धनगतसंख्यायाआरोपात् द्वित्वादिसंख्याबाधः । नवसंख्यावान्सत्वभूतोर्थः सर्वएवाभिधीयते · भेदा
भेदविभागोपिलोके सङ्ख्यानिबंधन इतिसंख्याप्रकरणे हर्युक्तिः कथमसत्वंभूतरूपायाः सङ्ख्यावत्व
मितिवाच्यम् · यथान्यायनयेगुणाश्रयद्रव्यगतयैवसङ्ख्यया आरोपेण गुणे द्वित्वादिव्यवहारः गुणो
गुणेनांगीकानाह्मनोपत्नांगीकानेनिर्वाहात् ० तथाद्रव्यगतयैवसङ्ख्यया आरोपेण गुणे द्वित्वादिव्यव

© Dharmartha Trust J&K. Digitized by eGangotri

भू०टी० हानः गुणेगुणानांगीकारे हावोपानंगीकारेनिर्वाहात्· तथा व्यापकतयैव सङ्ख्या क्रियायामपि तत्संभवात्·

5 क्रियायां संख्याश्रयो योग्यत्वव्यवहारस्तु अनानोपि संख्यानाश्रयत्वेन सर्वसंख्यानन्वयपदत्वेनावबोध्यः ।अ

नएववव्याप्यसूत्रेभाष्येन एकत्वाभावे पचन्तिपश्येत्यादौ तिङः आत्मनस्यापुंस्त्वनिमाके एकत्वादीनामुक्तत्वान्ते

द्व्युक्तं ।संख्यायाः कर्त्रादिवन्वयेनुत उक्ततायास्तस्या वक्रमेपि क्रियांगतायाश्च अनुक्तानदापत्तिर्दुर्वारा संभ

वात्यर्थः ।विशेषविशेष्यगतसंख्याभिधायित्वनियमात्· तथा द्वयवस्त्रे तिङः न प्रकृतिक रूपवाधं ते पचतीत्

यं पचतो रूपमित्यादौ संख्यालिंगाभावाद मोनुत्पत्तिमासे कथं क्रियाप्रधानसंख्यानं क्रियाचैकानद्वित्वादि

मतीति तिङन्तान्नेदं नवचनतेः क्लीवत्वस्वभावादिसमाधाय पदैकापचनद्वया तेकथं द्विवचनादौ साधी

वपसाधनापेक्षत्वादित्युक्तं ।तत्र साधनापेक्षमिति साधनगतसंख्यानो यापेक्षमित्यर्थः ।अनेन स्पष्टमे

© Dharmartha Trust J&K. Digitized by eGangotri

वक्रियायाः स्वभावादेकत्वं ज्ञानोपि न मूर्चद्वित्वादी सुगमम्। कार्य्यकारणभावश्चाख्यातार्थत्वेन सङ्कला
ख्यातार्थत्वात्प्रकारकशाब्दबुद्धिं प्रति धातुजन्योपस्थितिः कारणमित्येकएव संख्यायाः कर्तृविशेषणतावा
द्विमतं तु अनेककार्य्यकारणभावस्वीकारमिति गौरवमिति बोध्यम्। सापि प्रत्ययद्योत्या विशेषणत्वात्कृ॰
विशेषणीभूतार्थानां द्योत्यत्वमिति निपवक्ष्यमाणत्वात्॥ वर्त्तमाने लडित्यनेनेति प्रत्ययस्य द्योतकत्वाद्धातोरेव
कालोप्यर्थः तथा च वर्त्तमानक्रि॰ हल्लेङ्का नोर्द्दितिंत्यर्थः विशेषणता च द्योत्यादेव एकधातुप्रकृतिकानेकसङ्ग
देशानां तत्र शक्तिकल्पने गौरवात् तत्राभिमतफलजनने सति तन्निष्पादककारव्यापारापगमे भूत
त्वं क्रियायाः तादृशफलानवच्छिन्नतादृशसकलव्यापारस्याभावितत्वे भविष्यत्वं तस्याः पावत्ताभिमतफलप्र
योजकक्रियायाः समाप्तिर्न भवति तावद्वर्तमानत्वमिति बोध्यम्। तत्त्वधातोरिति परं चानत्रैकव्यापारेण वा तत्त्वयुः

© Dharmartha Trust J&K. Digitized by eGangotri

भू०टी० कालान्वयः कर्तृकर्मणोरेवेति। एकप्रत्ययोपात्तत्वादिति भावः। आपत्तेरिति। कर्तुर्वर्तमानकालिकत्वादिति भा
5 वः पश्यतीत्यनापत्तेश्चेति। पूर्ववत्। पचतीत्यापत्तेश्चेत्यपि बोध्यम्। इत्यनापत्तेरिति। फलस्य भावित्वादि
त्यर्थः। न चेति। न चैवमिति पाठः प्रयोगापत्तिरिति। फलानुकूलव्यापारस्य वर्तमानकालिकत्वात्। फले कालान्वा
न्वयेतु तुः स्यात् अनुकूलफलस्य वर्तमानकालिकत्वाभावेन नैयमापत्तिरिति बोध्यम्। अन्यत्रेति पाचक इत्यादा
वित्यर्थः। भावप्रधानमिति। यत्तु भावप्रधानमिति। व्युत्पत्त्या भावपरस्य प्रकृतिरूपभावपरतया तिङ्रूपाख्या
तार्थे भावसंख्यावर्तमानत्वादिके पुमध्येभावस्य प्राधान्यमित्यर्थबोधकेन भावप्रधानमिति निरुक्तेन नवि
रोधः इति। तन्न। क्रियाभेदाय कालस्य संख्यासर्वस्य भेदिकेति हर्युक्तेः संख्याकालयोः परिच्छेदकत्वनियमा
त्तयोर्विशेषणतावचनमनेनेति सिद्धान्तानुभुक्तिनिरुक्तवाक्ये वैयर्थ्यापत्तेः। आख्यातपदस्य तिङन्तपर

© Dharmartha Trust J&K. Digitized by eGangotri

नयावक्ष्यमाणत्वाच्च ॥ एतेनाख्यातं तिङन्तं धात्वर्थापेक्षयाद्वितीयं भावप्रधानमितिनुक्तार्थः । संख्याका
रकयोस्तुपरिच्छेदकत्वाद्विशेषणत्वं सिद्धमेवेत्यथयास्तं । प्रकृतिप्रत्ययार्थयोः प्रत्ययार्थप्राधान्यस्यात्र
क्लृप्तत्वेनतिङर्थभावप्राधान्यसिद्धेरितिनुक्तवाक्यवैयर्थ्यानुद्धारात् । प्रत्ययार्थप्रधानमाख्यातमित्येव । सि
द्धे भावप्रधानमाख्यातमित्यास्येरसंगत्यापत्तेश्च । भावाख्यातेऽव्याप्तेश्च । तत्र धात्वर्थापेक्षयाऽन्य
स्याः कृतेः प्रत्ययार्थत्वाभावात् । प्रमनुप्रक्लृप्तिप्रत्ययार्थयोरितिमुख्यसाकाङ्क्षकर्त्रादीनां प्राधान्यापत्तौ तदप
वादाय प्रकृत्यर्थभावप्राधान्यबोधकमितिनुक्तवाक्यस्यार्थकत्वं । एवं वक्ष्यमाणरीत्यानामपदस्यापिसुबन्त
परतयासत्त्वप्रधानानीत्यनेनप्रत्ययार्थप्राधान्यापवादायप्रकृत्यर्थद्रव्यप्राधान्यबोधनम् । एतेनसत्त्व
प्रधानानीत्यत्रप्रधानशब्दस्यवाचकपरत्वतयातत्साहचर्यात् भावप्रधानमित्यत्रापिप्रधानशब्दीनाच

© Dharmartha Trust J&K. Digitized by eGangotri

स॰भू॰टी॰ कपरइत्यपास्तं ॥ तत्रैव तस्य नतत्परत्वाभावात् ॰ तत्र तस्याशङ्कश्चेति दिक् ॥ क्रियाप्रधानमित्यत्र क्रियाश
6 ब्देन फलमपि यद्यपि इत्याद्यनुरोधात्· प्राधान्यं च धात्वर्थस्य तिङर्थकालकारकसंख्यापेक्षया। तेन प
च्यामहे गोधावेति भवतीत्यादौ परस्येति इत्थं क्रियाम् प्रति क्रिया— —विशेषणत्वेपि व्यभिचारः। आख्या
तमिति। आख्यातशब्देन नियमतो जनकांशस्य विभक्त्यन्तं गृह्यते। आख्यातमाख्यातेनेत्यादौ नथा द
र्शनात्· कृतितिङ्· धुविद्राख्यातपदप्रयोगस्तूपचारात् वोध्यः। पावकइत्यादौ तु प्रकृत्यर्थस्य अकाङ्क्षा
क्षत्वेपि प्रत्ययान्तार्थविशेष्यस्य ननदाकांक्षत्वं। पचतीत्यादौ तु विध्यन्तार्थविशेष्यक्रियायाः प्रसत्तदा
कांक्षत्वस्पष्टमेव। एतेनाख्यातपदेनाधातुरेवोच्यते आख्यायतेसर्वप्रधानीभूतोर्थोऽनेनेति व्युत्पत्ते
रित्यपास्तम् ॥ शिश्येइति तिङ्· न्तन्तेऽतिव्याप्तेः। कृत्प्रकृतिभूतधातावव्याप्तेश्च· नामाख्यातजानि

© Dharmartha Trust J&K. Digitized by eGangotri

यत्र तु आख्यातपदं सर्वं नाम धातुजमित्युणादय इति सूत्रभाष्योक्तेर्विभक्त्यन्तावयवधातुरूपं । एतच्च
ख्यातप्रधानानि नामानीत्यत्र नामपदेन तत्प्रत्ययान्ता क्रियाकारकं तत्त्व विभक्त्यन्त एव । प्रकृतिः विभक्ति
नामार्थबुद्ध्यादिषु तत्प्रधानमिति निन्तु तु भाष्योक्तेर्नु मन्ता आख्यातार्थप्रतिविशेषणं भव
तीति निर्णीतोक्तेश्च । न त्वपि अव्ययातिरिक्तं ग्राह्यम् । नामाख्यातोपसर्गनिपाताश्चेत्यत्र भाष्ये च्युपनु
पसर्गनिपातग्रहणं ग्राह्यमित्यन्यत्र विस्तरः । अवसीयत इति । तथा च निरुक्तभाष्यादिवत्तेनोपसर्गस्य
स्यागइति भावः । वस्यन्ते चाधिकमुपरिष्टात् · वचनविरोधमुक्त्वा युक्तिविरोधमध्याह । अपि चेति । त
मित्यध्याहारेण दोषमाह । भाष्यसिद्धेति । भाष्यसिद्धश्चोक्तिकैकवाक्यतानन्त्यादिरित्यर्थः । एकतिङ् वाक्य
मिति तु शास्त्रीनिधानादिकार्यमात्रविषयकमिति भावः । एकवाक्यताभङ्गभयेनाप्रयात्मतिषि

© Dharmartha Trust J&K. Digitized by eGangotri

ने.भू.टी.

षमान्येत्यादिनः प्रसंगातान्तेन। छित्तीमापन्नेति। ननु त्वन्मते दृशिक्रियायां धावतस्येव विशिष्टमृगस्यत
त्कर्मतामवश्यं नान्वये प्रनष्टितायामपि च:। न च तंडुलः पचतीतिप्रयोगवारणाय धात्वर्थविशेष्यक
मार्थप्रकारककर्मतासंसर्गकशाब्दबुद्धिं प्रति नामोत्तरविभक्तिजन्यकर्मत्वोपस्थितिः कारणमित्युप
तेर्न तथान्वयबोध इति वाच्यम्। दुग्धस्य स्याकेवलनामार्थस्य कर्मतया धात्वर्थेनान्वयानङ्गीकारेपि
विशिष्टवाचकपदस्य नामार्थत्वाभावेनोक्तव्युत्पत्तेर्विषयतया धात्वर्थेन सकर्मतयाऽन्वयाङ्गीकारे
क्षतिविरहात्। अत एव श्रुतामप्येतन्मात्रमित्यादौ श्रुतत्वविशिष्टेऽस्त्रिन्नपवाक्यार्थस्यान्व
ये दृशीपाककर्मतासंबन्धेन श्रवणः क्रियान्वयः संगच्छत इति चेन्न उक्तरीत्या शुभ्रस्तंडुलः पचतीत्यादे
रपि शुभ्रत्वविशिष्टतण्डुलरूपवाक्यार्थस्य कर्मतया क्रियान्वयबोधापत्तौ साधुत्वापत्तेः। नचेष्टापत्तिः।

© Dharmartha Trust J&K. Digitized by eGangotri

भीष्मंकं रकुर्वित्यादौ समाससंपादनं विशिष्टविशिष्टस्यैव कर्मत्वमिति द्वितीयपक्षप्रतिपादनपरकर्मधारयप्र
करणस्य भाष्यविरोधापत्तेः । तत्र हि विशिष्टस्य कर्मत्वेपि प्रत्येकं द्वितीयां विनानिशिष्टगतकर्मत्वस्योपपाद
यितुमशक्यत्वेन द्वितीयान्तरयोरेव विशेषणविशेष्ययोः साधुत्वप्रतिपादनात् । विवेचयिचयिष्यते चेदं
समासवादे तस्मात्मृगात् द्वितीयापत्तिनिर्विघ्नात स्यात् न न वा समासिद्धिः अथ प्रथमासामानाधिकरण्ये
न शत्रादेः प्रसंगात् । न च प्रथमान्तेन सामानाधिकरण्येपि पचन्देवदत्तः धावन्मृगस्तिष्ठतीत्यादौ शत्रा
देर्दर्शनात् । मृगस्य प्रथमान्तत्वेपि कुतो न शत्रादिरिति वाच्यम् । लटः शतृशानचाविति योगं विभज्य तत्र
वैत्यनुवर्तनेन प्रथमासामानाधिकरण्येपि विकल्पेन शत्रादेर्विधानात् धावति मृग इत्यस्योपपत्तिः अ--
मासामानाधिकरण्ये इत्यस्य योगो नित्यार्थस्तेन न तु तत्र दोषः स्यादेवेति भाष्यस्पष्टं । न धावनानुकूलकृति

© Dharmartha Trust J&K. Digitized by eGangotri

स्व॰भू॰टी॰ मान्मृग इति वाक्यार्थस्य कर्मत्वे तदर्थकवाक्यस्यानामत्वान्न द्वितीयापत्तिः नापि व्युत्पत्तिविरोधो व्युत्पत्तेर्ना
४ मार्थप्रकारकबुद्धिविषयत्वस्योक्तत्वात् । भुत्वाममेतद्द्वितिवादितिशाकाम् ॥ धावनक्रियाविशिष्टस्य मृगस्य
मृगादतिरिक्तत्वात् । विशिष्टं शुद्धान्नातिरिच्यत इति न्यायात् । यत्तु विशिष्टस्यानतिरिक्तत्वेऽपि विशिष्टकेवल
प्रकारतयोर्भेदान्न दोष इति तन्न । तयोर्भेदे न तयोर्भेदेन प्रकारताघटितव्युत्पत्तिविषयतया तथा बोधोपप
त्तावपि द्वितीयावारणस्य कर्तुमशक्यत्वात् । अत एव नीलत्वविशिष्टघटस्य कर्मत्वविवक्षायां नीलं घटं पश्ये
त्यादौ विशेषणविशेष्याभ्यां द्वितीयातिरिक्तत्वेऽत्वत्रैव सा न स्यात् । न तत्रापि मृगीयधावनस्य विशिष्टस्य दर्श
नकर्मत्वे विशेषणविशेष्ययोरुभयोः कर्मत्वाद्विशेष्यवाचकधावतिपदस्य द्वितीयोऽस्त्वनावयोग्यत्वे विशेष
णवाचकमृगनपपत्तिपादकात् । द्वितीयत्तिरिति वाच्यम् । मृगस्य धावनविशेषणत्वेन तत्प्रयुक्तान्तरग

© Dharmartha Trust J&K. Digitized by eGangotri

संस्कारस्यप्रथमान्तपदस्यानिरूक्तेस्तवनुमृगस्यधावनविशेष्यत्वात्दृशेः साक्षाद्विशेषणत्वात्प्रधानकार्य
स्यान्तरंगादपिवलवत्वात्याहेतुमतिचेतिसूत्रस्यभाष्यसम्मतत्वेनद्वितीयादुर्वारमन्मनेन्नुत्वामप्येतत्तदिसा
द्धौचार्थत्वान्नद्वितीयेति। यत्तुपदं वमृगधावतीत्यादिवाक्येत्वनंकर्मत्वोपस्थापकमितिपदमध्याहृत्यसर्वत्र
कर्मस्थलेऽन्वयबोधः धावनानुकूलकृतिमान्मृगस्येत्यर्थकर्मत्वेविधेयतयान्वयबोधस्येत्यर्थकर्मत्वस्यनि
रूपकतासम्बन्धेनदृशिक्रियायामेन्वयबोधस्यवन्निर्णवाधत्वात् नचघटमानयेत्याद्यौ द्वितीयार्थकर्मत्वेउ
द्देश्यतयाऽकर्मधृत्यर्थान्वयस्यभंगइतिवाच्यम् विभक्त्युपादानेनतथाव्युत्पत्ति २ वीकारेणेतिपदसमभिव्या
हारेनव्युत्पत्तिशंकोचादिति। पदमध्याहृत्यपदैनैवाक्यार्थोपस्थितिस्तस्ताहृशावाक्यंचतात्पर्यग्राहकमिति
पदोत्तरद्वितीयायाश्चकर्मत्वमर्थस्तावतैवविभक्त्यर्थद्वारानामार्थधात्वर्थान्वयबोधसम्भवतितदुभय

© Dharmartha Trust J&K. Digitized by eGangotri

ल॰भू॰टी॰ मपि चिंन्त्यम्। तथा सति तंडुलः पचतीत्यादावपि सर्वत्रेति पदमध्याहृत्य नामार्थधात्वर्थयोः साक्षादन्वयबो
१ धापत्तौ साधुत्वापत्तेः प्रथमे क्रियान्वयितावच्छेदकोद्भूतत्वा किंमत्वेन कर्मत्वस्येति पदादनुपस्थित्यातत्सत्क्रि
यान्वयासम्भवाच्च। अन्यथा घटः कर्मत्वमानयेत्यादितोपि घटकर्मकेत्यादिबोधापत्तेः प्रथमायाः कार
कविभक्तित्वेनाक्रियान्वयनियमान्मतास्पेत्यर्थे कर्मत्वेन्वयासंभवाच्च। उक्तव्युत्पत्तिविरोधाच्च। द्वितीये
तिपदोत्तरकर्मद्वितीयानुशासनाच्चेति -- केचित्। यदपि दृशधातोरेव धात्वकर्तृमताकर्मकर्मदर्शनि
लक्षणानिनुक्तवाक्यन्तात्पर्यम्याहकमिति। तदपि न। निरुक्तार्थे दृशधातोर्लक्षणापदान्तरस्य चेत्य
त्वविनिगमकाभावात्। न च दात्म्यत्त्पसङ्कवन्धस्य लघुत्वाद्दृशेरेव लक्षणेति वाच्यम्। एवमपि पश्यति
मणौ धावतीत्यादौ दृशेर्वा लक्षणेति प्रत्ययस्यैवेति विनिगमनाविरहेणादवस्थ्यातुभयत्रापि तादात्म्यस्यै

© Dharmartha Trust J&K. Digitized by eGangotri

वशाच्चसम्बन्धत्वात् · नविभक्त्योर्लक्षणेति सुबविभक्तियत्नमितिकेचित् ॥ यद्यपि दृशधातोर्मृगकर्तृको
त्कृष्टधावनकर्मदर्शने लक्षणया मृगो धावन्तीति वाक्यस्य तात्पर्यग्राहकं । अतएव जानामि सीतां जनकप्र
सूतामित्यादौ न निर्वाह इति · तदपि न · शक्यार्थघटितत्वेन लक्षणायां तात्पर्यग्राहकत्वस्य चित्रावासो चित्रादि
पदे स्वीकृतत्वेपि विशेषणविशेष्यभावव्यत्यासेन लक्षणायां तात्पर्यग्राहकत्वस्य त्वन्मतेप्यसंभवात् ·
नच प्राप्तोदको ग्राम इत्यादौ तह्यसमासेन लक्षणायां प्राप्तादिपदं तात्पर्यग्राहकं कृतमिति वाच्यम् · तथा
पि प्राप्तिकर्तृ अभिन्नोदककर्मेत्यादि शक्यार्थघटितलक्षणायामेव प्राप्तादिपदस्य तात्पर्यग्राहकताया न
व्यताविवेतुनत्वात् · तत्र कर्मतानिरूपकत्वस्योदकेऽबाधेपि तद्विशेषणीभूतप्राप्त्युपर्यवसानं बोध्यम् ·
अनुकूलत्वं वाचनिति परमिति शास्त्रादनिति परस्यानुकूलत्वस्य सम्बन्धाभावान्नारदइसकोधीत्यादिवत् · सी

© Dharmartha Trust J&K. Digitized by eGangotri

नाजनकपस्स्तेति ज्ञानामिति ज्ञानानुकनणत्वेनोपपत्तौ लक्षणेभ्याः प्रयोजनाभावाच्च॰ यदापि मैथि
लाः क्रियाप्राधान्यवादिमते प्रयाति पुरुषस्तस्य पादयोरभिवादये सर्वनाम्नाऽप्रधानपरामर्शकतयात्वद्
त्वदनुप्रधानीभूतप्रयाणादिकर्तृपरामर्शेऽन्वयबोधानुपपत्तिः॰ अस्मन्मते प्रधानभूतप्रधानभू
तपुरुषादिपरामर्शेनानुपपत्त्यभावादित्याहुः तदपि न सर्वनाम्नोऽप्रधानपरामर्शकत्वस्यौत्सर्गिकत्वात्॰
अत एव दर्शनेरज्जमानं गास्तस्य वामीतुरगमाः । चैत्रो ग्रामं न गतस्तत्र मैत्रः किं कुरुतेऽधुना चैत्रप्रज्ञावलीय
मेतस्मै देहि वंचलमित्यादौ तत्त्वद्व्यस्य यथाक्रमं राजग्राम-भ्यात्यपरामर्शकत्वानुपपत्तेः किञ्च तिङन्तो
पस्थितक्रियाया असत्वभूतत्वेन सर्वनामपरामर्शयोग्यत्वाभावाद्विशेषणीभूतकर्तृपरामर्शः विशे
षणविशेष्ययोः नुभयोः सर्वनामयपरामर्शयोग्यत्वे सर्वनाम्नोऽप्रधानपरामर्शकत्वमिति नियमात्॰

© Dharmartha Trust J&K. Digitized by eGangotri

किञ्च· परमसिद्धान्ते क्रियाक्रियावतोरभेदात् कर्त्तात्मा यत्र क्रिया यास्तदापरामर्शे विनान्वयबोधा
निर्वाहः समानविशेष्यकबोधजनकोत्तरवाक्यस्यैव शंसस्य निवर्तकत्वादिति· तन्न· तस्यार्थिकोत्तरत्वेना
दोषात्· अन्यथा नवापिमते भवद्भिस्तूयतेऽत्रकेति प्रथमान्तार्थज्ञानस्यद्रव्यविषयकमस्ते स्तोत्रं ममैत
त्क्रियतेरत्यस्य प्रथमान्तार्थस्तुतिबोधजनकत्वाभावप्रसङ्गः· यदितु प्रश्नोत्तरभावविषयेकः कुत्रीनोप
स्यधनमित्यादिप्रश्नोत्तरानुरोधात्· प्रश्नसमानविशेष्यकबोधजनकस्यैवोत्तरत्वमिति नियमो नांगीक्रि
यत इत्युक्तप्रश्नोत्तरवाक्येन दोषइत्युच्यते· तदाचैत्रो धनवान्नवाचैत्रस्य धनमित्याद्यनुरोधात्· संसयो
त्तरेऽपि तादृशनियमानङ्गीकारान्नदोषइतिदिक्· यत्तु मिश्राः त्रयः काऽन्याद्दसादेः क्रिसमभिहाराभावेन
तत्प्राधान्यासंभवात्· प्रथमान्तार्थस्यैव मुख्यविशेष्यत्वमिति· तन्न· कारकविभक्तेः प्रथमायाऽउत्संलयेस

© Dharmartha Trust J&K. Digitized by eGangotri

ल॰भू॰टी॰ तीतिक्रियाध्याहारेक्रियामुख्यविशेष्यकबोधापत्तेः प्रथमायाःकारकविभक्तित्वप्रतिपादनञ्चमञ्जूषादौ
॥ स्पष्टम्· नन्वेवमपि अतीतभविष्यतोर्विद्यमानत्वासंभवः। परपूर्वक्षणयोर्भूतभविष्यदितिव्यवहारविषयमा
णस्यकार्यस्यसत्त्वादिविद्यमानत्वेनतदसंभवाभावात्· चैत्रे[illegible]रासुप्यतोऽग्रणुदेवदत्तोगणपतिग्रामात्सोविवाहआ
हूयपत्कन्यादीपत्नेस्वयमित्यादौक्रियाविशेष्यकबोधस्यानापत्त्यात्वपार्श्वेकाराच्च· यद्यपिक्रियासकारका
परेक्रियाविशेष्यकबोधेच्छयोच्चरितवाक्यमशाध्वेवपचतिभवतीतिनुभाष्यकृत्प्रयुक्तंतिङ् तिङ् इति
सूत्रेऽतिङ्·ग्रहणात्ज्ञापकात्साधित्वनितदपिन· ज्ञापकात्साधुत्वेगच्छतिभवतीत्यादेरपिसाधुत्वापत्तेः।
नचभाष्यप्रयोगात्साधुत्वं।पचादयःक्रियाःभवतिक्रियाकर्त्र्योभवंतीतिभाष्येबहुवचनादिशब्दोपादाने
नगच्छतिभवतीत्यादेःसाधुत्वानिवारणात्· नचैवमन्वन्दनेसंयोगेनसुखयतीत्यर्थेचन्दनंसम्पन्नमितिसु

© Dharmartha Trust J&K. Digitized by eGangotri

रवयति· नाशाय गच्छतीत्यर्थेन स्यपतिगच्छतीत्यादेरपि साधुत्वापत्तिरिति वाच्यम्· भाष्ये भवतिशब्दोपादाने
न आदिपदादाने न च पश्य मृगो धावतीति प्रयोगे एव भूभिन्नधात्वर्थनिरूपितकर्तृकर्मश— मकारकत्वेन
क्रियायामन्व— क्रियान्वये साधुत्वबोधनेनादोषात्· तथा चोक्तं क्रियानपुज्यते लिंगं क्रियानाधारकार
कैः असत्वभूततानस्याद्ययमेवावधार्यतामिति पचति भूते इति तु सत्त्वाभिधाने इष्टमेवेति संक्षेपः पदपि
पदार्थकेन तिङ्न्तेन वाक्यार्थजननयित्वा पश्चद्द्वितीये न तिङ्न्तेन संभयवा वाक्यार्थो जन्यते तत्र द्वितीयान्त
त्वादिनतन्त्रं· अत एव नीलो घटः पश्येति न प्रयोगः । तत्र प्रथमतिङन्तेन वाक्यार्थबोधजननोभावेन द्वि
तीयान्तत्वापेक्षणात्· पश्य मृगो धावतीत्यादौ तु एकतिङन्तेन प्रथमं बोधं जनयित्वा ङ्‌ति न्तान्तरेणान्वयबो
धजनने द्वितीयान्तत्वानपेक्षणान्न दोष इति निर्दयिन· यस्य लक्ष्मण सम्प्रायां चकः परमधार्मिक इत्यादे

© Dharmartha Trust J&K. Digitized by eGangotri

स्व·भू·टी· विशिष्टगतकर्मत्वविवक्षायामसाधुत्वेन तवाभिमतस्यासाधुत्वापत्तेः न च तत्राप्यस्तीत्यध्याहारेणैकक्रियान्व
12 यबोधपूर्वकक्रियान्तरान्वयबोधसत्वादुक्तनियमाव्याघात इति वाच्यम्· तथा सति नीलो घटः पश्येत्यादे
रपि तदध्याहारेण साधुत्वापत्तेः। एकस्यैव प्रयोगस्य पक्षभेदेन साधुत्वयोर्दुर्वचत्वाच्च· यदपि ग्रामं गच्छ
त्यानयत्याश्वे आगमनक्रियायामानयनकर्मत्वे बाधितमिति दूषणं· — तदपि ग्रामश्वगतकर्मत्वस्य गम
नादावुपचारेण क्रियाक्रियावतोरभेदेन वा परिहरणीयम्· इयमेव मारयमाणो धावतीत्यादावपि गतिः· केचि
त्तु उक्तस्थलेऽस्त्यत्र मिस्सध्याहारेण वाक्यभेदमुदाजहुः। अन्ये विधिप्रतिषेधौ विशेषणमुपसंक्रामतः
सति विशेष्ये बाधे इति न्यायेन शिखी ध्वस्त इति वत्· विशेष्यभूतागमनधावनक्रियायोरानयनमारण
रूपक्रिया कर्मत्वासम्भवेऽपि तद्विशेषणीभूतकर्त्रोश्च तयोरन्वयः न चैवं द्वितीयापत्तिरिति वाच्यं

© Dharmartha Trust J&K. Digitized by eGangotri

शाब्दकर्मत्वान्वयिनैव द्वितीयाप्रवृत्तेः। अत एव अनुगोकरणीन्यायेन प्रत्येकं क्रियान्वयाभिप्रायेण रु
टापि कर्मभीष्मादयोपि कर्मेति भाष्यकृदुक्तिः सङ्गच्छते। अन्यथा विशिष्टस्य कर्मत्वेपि आर्थिकप्रत्येककर्म
त्वमादाय प्रत्येकं द्वितीयोत्पत्तौ सिद्धायां तदुक्तेः सङ्गतिः। मारयमृगं धावतीत्यत्रानुरोधनानुकूलव्यापारा
र्थकत्वेन मृधातोस्तस्य च धावने बाधादुपपत्तिः मृगो मारणविषयोऽनुरूपं मारणेन तु आर्थिकं प्रतीयते इत्यप्याहुः
तस्मात् ज्ञानार्थकधातुसमभिव्याहारे एकक्रियाप्रकारकसंसर्गकापरक्रियाविशेष्यकबोधः स्वारसिको
बाधात्तद्भिन्नार्थकधातुसमभिव्याहारे तु बाधात्। आनोपाभेदाभ्यां नि बाल्ये पदि प्रयोगाः सन्ति। पशुपत
श्यमानेत्यादिप्रयोगाणां त्वनभिधानमेव। पदिनत्स्तत्तापामाग्रहस्तत्र युक्त प्रथमोत्पत्तयेऽस्तीत्यध्याहृत्य निर्वा
ह्याद् इति विकृतत्वम्। अध्याहारे युक्तिविरोधमप्याह। उत्प्रेटति। अनन्वयापत्तेश्चेति। द्विशिक्रियाकर्म

© Dharmartha Trust J&K. Digitized by eGangotri

ल·भू·टी·
13

त्वेनप्रतिपादयिष्यतिमगकर्तृकोत्कटधावनक्रियास्त्विमितिपुंल्लिङ्गे प्रधानपरामर्शकत्वेनपरामर्शशंभवादि
त्यर्थः तामिस्यधात्वाहोभे यितत्ये वानान्वयः सर्वनाम्नाप्रधानपरामर्शित्वात्। क्रियायाश्चासत्त्वभूतत्वाच्चेति फ
ले कर्तुरन्वयवारणायाह। भावनात्वेविच्छिन्नेति। भावनाप्रकारकेतिपाचकइत्यादिविषयं॥ धात्वर्थभावने
ति। भावनाप्रकारकबोधंप्रतीत्येतदनुकृष्यते। तत्प्रयोजनमाह। पश्येत्यादि। दिगिति। किं क्रियाप्रधानं किं
द्रव्यंप्रधानमिति प्रश्ने रमते ब्राह्मणकुलमितिप्रधानमिति द्विस्थाने पुंसकइति क्रियाप्रधानमितिहस्वोन
पुंसकइतिसूत्रस्यभाष्यमपिक्रियाप्राधान्ये साधकं बोध्यम्। याविच्छित्तिस्तदनुकूलेति। अत एव हरिः सेव्य
तेइत्यत्राप्येवमेवदीक्षिताः वस्तुत एव काश्रयिकायावर्तमानाभावनातज्जन्यैककर्तृकत्वाश्रयिकाविच्छित्तिरि
तिफलविशेष्यकएवर्तृत्वंपच्यतेइत्यादौ बोधः पक्तृत्वमित्यादौ फलस्यविशेष्यतायाः स्वस्यापव

© Dharmartha Trust J&K. Digitized by eGangotri

श्यवक्तव्यत्वात्· अन्यथा प्रत्ययार्थे साक्षात्प्रकृत्यर्थविशेष्यान्वयित्वस्य सर्वत्र क्लृप्तस्य त्यागापत्तेः अ
न्वयित्वस्य पच्यते इत्यादौ विशेष्यतया प्रकृत इत्यादौ विशेषणतया बोध्यं· अत एव पच्यते पुत्र इत्यर्थे पुत्रीयतीति न
प्रयोगो भिन्नार्थत्वात् किन्तु पुत्रमिच्छतीत्यर्थे एव पुत्रीयतीति क्यजन्तत्वात्· कर्मणि प्रत्ययस्तु नाकर्मकत्वादिति सु
प आत्मन इत्यत्र भाष्ये उक्तम्· अन्यथोभयत्रापि पुत्रकर्मकेच्छानुकूलो व्यापार इति बोधे न भिन्नार्थत्वकल्पना
संगतिः स्यात्· इच्छानुकूलो व्यापारश्चात्ममनःसंयोगादिर्नैव च अस्मन्मते चैत्रव्यापारो विशेष्योपरञ्ज
कत्वमिति भिन्नार्थत्वस्य हेतुमेव चैप्यटोप्याह· परक्रियाफलस्य प्राधान्यं तदा वाक्यमेवेष्टः पुत्र इष्यते पुत्र
इति ननु स्पष्टं न मितीति· अत एव फलव्यधिकरणे व्यापारे व्यापारव्यधिकरणे फले च धातोर्द्वयोः शक्तिरित्यवोचा
मेति दिक्· आख्यातार्थकर्त्रादिति स्वार्थस्येति· ननु धात्व विशेषणतया बोधविषयकात्मो हैमपरार्थ· पश्ना

© Dharmartha Trust J&K. Digitized by eGangotri

ल.भू.टी. ऐतिन्यायेन कथं चैत्रादेर्विशेषणतयान्वयि इति चेन्न. कर्तृत्वेन सामान्यरूपस्यार्थस्य नियमेन विशेषाकांक्षा

14 वत्त्वाद्विशेषणीभूतेनापि तेन विशेषणतदन्वयात्. यथा नियताकांक्षावसादेव चैत्रेण गतो ग्राम इत्यादौ विशे

षणीभूतक्रियायां कारकान्वयस्तद्वत्. ननु ध्वंसात्मकनाशरूपव्यापारस्य जन्यत्वेपि अविनाशित्वेन नित्य

त्वात्सर्वदा नश्यतीति प्रयोगापत्तिरत आह. घटो नश्यतीत्यत्रेति. तस्य नित्यत्वेपि तदनुकूलव्यापारस्यानि

त्यत्वान्न सर्वदा तत्प्रयोग इति भावः ननु नाशसामग्री नाशोत्पादको व्यापारस्तस्य वयदाचभावात्. घटा

देः कर्तृत्वानापत्तिर्नाशानुपपत्त्याश्रयत्वेन घटस्य कर्मणः सत्वात्सकर्मकत्वापत्तिश्च घटे द्वितीयापत्तिश्चा

त आह. प्रतियोगित्वविशिष्टेति. सामानाधिकरण्यसंबन्धेन प्रतियोगित्वविशिष्टस्यार्थः साच घटे एवेति भा

वः. यद्यपि प्रागभावध्वंसोपि कपालाद्यवयववृत्तिरेव न घटादिवृत्तिः तथापि प्रतियोगित्वव्यापारो बदा

© Dharmartha Trust J&K. Digitized by eGangotri

द्विवत्त्वेति भावः। अत एव वः व्यापारांगीकारादेव· तदस्ययेइति· नासमग्रीरूपव्यापारात्मकविशेषणविरहप्र
युक्त एव विशिष्टाभावइत्यर्थः। कचिदवधानानुकूलव्यापारेन सन्धातोः सक्तिः यथा हतं न घं न्व लभ्यते
इत्यादौ· वस्तुतउभयत्र शक्तिस्वीकाने गौरवान्नासानुकूलव्यापाने एव शक्तिःऽनासो ध्वंसः। स च तिनोऽभा
वा व स्याप्रागभावोपि कारणेशक्तिरूपेणावस्थानं सत्कार्यवादाद्यभ्युपगमात्· निरूपविष्यते वेदमुपरि
ष्टात्· ततश्चैतत्प्रयोगेऽप्यर्थं कृत्वा स्वीकानेपि न सन्धातो प्रदोषः॥ ज्ञानेच्छादीति अत्र फलतावच्छेदकः
संबन्धो विषयतानसमवायस्तथात्वे फलव्यापारयोर्वैकनिष्ठत्वादकर्मकत्वे नेश्वर इत्नोघटं जानातीति प्र
योगापत्तेः नन्वात्मनः संयोगरूपस्य ज्ञानाद्यनुकूलव्यापारस्यात्मदादौ सत्त्वेपि ईश्वरनीयसम्भादेर्नित्य
त्वेनेश्वरेऽभावादीश्वरो जानातीति प्रयोगापत्तिरित्यत आह· अन्नत आश्रयतैवेति ईपधानोरिच्छानु

© Dharmartha Trust J&K. Digitized by eGangotri

कृत्को व्यापारोर्थः स च स्नानमिति केचित्. तन्न दृश्वनेच्छायास्तत्स्नानवत्त्रिसत्वेनैश्वनद्व्वह्तीत्यनापत्तेः
अतीतानागतयोरपि तदुपरिहारात्. फलशालित्वम् यद्यपि व्यापारसमुदायस्य तद्रूपक्रियात्व माश्रयता
यां न संभवति तथापि तात्कालिकानां एकां क्रियेत्यादि वक्ष्यमाणरीत्याऽऽख्यातोपेण बोध्यम्॥ यदोत्तरी
त्याविशेषान कालभेदमाश्रयतात्रूप व्यापारे आनोप्यक्रियात्वं बोध्यम्. उभयबोधापत्तिरिति. कर्मण्युत्त
त्वाद्देद्नं भवतीत्याद्वौ द्वितीयानायन्निरित्यपि बोध्यम्. नन्वेकस्माद्विबोधान्नोभयबोधो युगपदतः पर्याये
णेतमाह. कर्तृमात्रेति. तङानदपद्धति. भावकर्मणोरिति विहितस्तङ्. याख्यस्तेनैय त्वेनि विशिते इत्याद्दैना
ति प्रसङ्गः पद्यपि शवाद्यभावे पि लिङाद्दौ कर्तुर्विधोगस्त्वैत्याद्दौ च तिभाद्यभावे पि तथाप्य बोधीद्विस्या
द्दो विणादेः कर्मद्योतकत्वाभावाद्योन्वयव्यभिचारस्तङ्द्वारस्योत्सर्गो पि मूलोक्तस्यात्रव्यतिरेकव्यभिचा

© Dharmartha Trust J&K. Digitized by eGangotri

नाविषयेष्वङ्गीकारान्नदोषः यकृ विणादीनामपि क्वचित् फलाश्रयपद्योतकत्वं नास्तीत्यास्मृते। नन्वे
वमिति। पाकानुकूलइति· यदा यदा सकर्मकाणामपि सौकर्यातिशयाविवक्षया कर्तृव्यापारस्यागे फल
समानाधिकरणव्यापारपरत्वेन कर्मणएव कर्तृत्वविवक्षया कर्मकत्वं तदा कर्मस्थक्रियाकाणां पच्यादीनां
स्ववाच्यकर्तुः कर्मवद्भावे नयगादोपच्यते ओदनस्वयमेवेतिप्रयोगः वस्तुतः फलपरत्वमात्रेणैव कर्मणः
कर्मणः कर्तृत्वविवक्षायामकर्मकत्वे बोध्यम्· स्वयमेवेति ननु कर्तृत्वे तरनिरूत्तौ तात्पर्यमाह कम्· पच्यते
इत्यस्य चविक्लिद्यत इत्यर्थः कर्तृस्यक्रियाकाणामनुपस्थितिरजेति स्थानविषयो भवतीत्यर्थः कर्मस्थक्रिय
कत्वाभावेन कर्मवद्भावाभावान्नयगादि। न चैकस्य धातोः स्वार्थत्याग पूर्वकमन्तरवृत्तौ शब्दार्थसंबन्ध
नित्यताहानिरिति वाच्यम्· धात्वन्तरत्वात्· उपचयाकेइत्याद्यर्थनिर्देशस्तु तन्त्रेण निर्देशः तदुक्तं एकदे

© Dharmartha Trust J&K. Digitized by eGangotri

ल॰भू॰टी
16

शेषमूह्येव्यापाराणांऽन्वयप्रवाद्यः स्वभावतः प्रवर्त्तन्ते तु स्वरूपं समाश्रितादिति दिक्॰ भावार्थस्य कानेतुभा
वनैव विशेष्यात्तिङ् त्वनुवादक एव काऽव्द्योतकश्च क्रियाया एकत्वादेकवचनमेवस्तु न्यम्॰ केचित्तु क्रियायाः
सङ्ख्याश्रयोग्यतिमतोत्सर्गिकमेकवचनस सङ्ख्यान्वयपि कर्तृकर्मणोः शब्दतोऽप्रतीतेर्न नञ्ता यास्तस्यान्वयो
यः अत एव मध्यमोत्तमावपि न तिङ् समानाधिकरणयुष्मदाद्यभावादित्याहुः तन्न युक्तम्॰ क्रियायाः स्वत
एकत्वात् । अत एवाव्ययेभ्यः संख्याभावाद्वचनानुपपत्तिमाशंक्यौत्सर्गिकमेकवचनमुक्तं भाष्ये ननु भावार्थे
भ्योऽपि तदनुत्पत्तिस्तयोक्तमिति॰ ननु भावे प्रथमपुरुषोऽपि मा स्यात्तस्यापि शेषे नियमत्वादिति चेन्न॰ शेष इति
पदं त्यक्त्वा प्रथमस्यौत्सर्गिकतया भाष्य उक्तत्वेनादोषात्॰ अथवास्त्वत्र शेषे इति शेषयोः शेषस्यैकदेशस्यानु
वाद इत्यस्यात्र विस्तरस्तु वोपपद्य इति कर्मण एष कर्तृत्वाव्यापाराश्रयत्वात्॰ सामान्यविशेषज्ञाने ति॰ तच्चोपस्थि

© Dharmartha Trust J&K. Digitized by eGangotri

बामिति पूर्वपयोक्तम् सकर्मकेति तेनाकर्मकधातुसमभिव्याहृतलकारस्य शास्त्रातिदेशपक्षेपच्यते आदनः स्व
यमेव सुप्यते इत्यादिप्रयोगस्य स्वयमादेर्निरासः भावसाधनलेसादिविशेषणस्य चोपादानमेवोधीतिकर्तृ
लुङ् समभिव्याहृतदीपजनेति विलवारणाय प्राभाभाकरादीन्प्रतीति तन्मते फलमेव धात्वर्थः भावनातु
नकस्यापि शाब्दबोधस्य तद्विषयकत्वात् । लिङादेवतु सारव्यातवाच्यक्रियाप्रधानमास्यलिङ्विषयकत्वमे
वतन्नैव क्रियाया विशेष्यतयाबोधात् । पचतीत्यस्य पाकं करोतीति विवरणं च शब्दार्थसम्बन्धघटकक्ति
विवरणमेव पचति चैत्र इत्येतत्स्यदजन्यबोधो धात्वर्थस्य पाकस्यानुकूलवृत्तिमत्वसम्बन्धेन चैत्रे विशेषण
त्वादिति नेतद्विवरणमपि तद्वाच्यत्वसाधकं धात्वर्थप्रकारकप्रथमान्तजन्योपस्थितिर्हेतुरिति कार्यकारणभा
वः कारकाणामन्वयोपि धात्वर्थफलेनैव सम्बन्धस्तु यथायथमूह्यः आख्यातार्थश्च संख्याकालाविति प्राभा

© Dharmartha Trust J&K. Digitized by eGangotri

ल॰भू॰टी॰ 17

करादीनित्यादि शब्दग्राह्याश्चाख्यातत्वेन सकर्माख्यातस्य भावनावाचकत्ववादिनो भट्टास्ते हि धात्वनासिद्धो
भावो यागस्यादिरूप उच्यते न कृतं साध्यत्वं तु आख्यातेनोच्यते इत्याख्यातार्थो भावना यदाहुः धात्वर्थव्यक्तिने
केन यद्यप्येषा नलक्ष्यते तथापि सर्वसामान्यरूपेणैवाभिधीयत इति यत्र एव च भावना यत् पचतीत्यस्य पाके प
तनेइति प्रतीतिर्यत्नस्य धात्वर्थत्वाभावात् रथो गच्छतीत्यादौ चाश्रयतारूपैव भावना तस्याश्च साध्यतारूप
त्वेन भानस्य पर्वताः स्रवन्तीत्यादौ यत्सम माणेनीता शाब्दिकैरप्येश्वीकारात् सैव यमर्थभावनेत्युच्यते इति वद
न्ति तान् दूषयितुमाह व्यापारो भावनेत्यादि धात्वर्थस्य सिद्धरूपत्वाभावात् व्यापार एव भावनेति भावः यद्य
पि सकर्मिकैव क्रियात्व कर्मिका योतिभेदस्तथापीति साध्यत्वाविशेषात् · अपत्यानां । पत्नमित्रालं भावशब्देन
य – स्येयत्नन्त्वां नरे म सिद्धतया पूत्कारादीनां संग्रहार्थमू व्यापार इत्युक्तिरिति भावः नैयायिकरीत्या शंकते नचे

© Dharmartha Trust J&K. Digitized by eGangotri

वमिति । यत्से तदनन्तरं कृतेरारव्यातार्थत्वं श्वीकृ से ति शेषस्तेन नने प्याप्तिमत्त्वाघातः अतएव वक्ष्यतिनैपापि
करोतीति अथवा मरनपदानुकारीति पदोक्ता च तावन्मात्रवैषम्यमस्ति कृसैयमाश्रं को तिलिध्वनितं यद्वा कृ
त्यानुकूलोपत्ताधात्वर्थ इतिता किं कि कदेशिमतेनेदमिति वोध्यम् रथो गच्छतीति गमनानुकूलकृतेर चेतने
वाधात्ना नामीत्यादौ स्थाने छाधकृतीनां अभिकत्व श्वीकाराः कृते र्ज्ञीन तनकत्वाभावाच्चाद्रूपव्यापानो नत्वमक्षरे
तिभावः सकमतावच्छेदकत्वस्यापीति अस्मन्मते अरव्यातस्य कर्तरि शक्तो व्यापार रूप कर्तृत्वं शक्यतावच्छेदकं
तवनु रथो गच्छतीत्यादौ तत्र ज्ञस्यतावच्छेदकमिति भावः गुरुणीति तथा च संभवति लघो अवच्छेदकत्वे गुरौ तद
भावइति नियमः कारणतावच्छेदकत्वादिपन एव नैतम्मन इति भावः करोतिना । कृधातुना असिद्धेति अतएव
भ्रूयादि सूत्रेक्रियावचनो । चानुदिरिति न्यासे कथं ज्ञापते क्रियाय वचनाः पवाद इत्याशंक्य पदे तेषां करोति

© Dharmartha Trust J&K. Digitized by eGangotri

ल.भू.टी.
14

नासामानाधिकरण्येऽपि विकल्पोऽनियचतीकमन्तथा कस्माद्व्याख्यातस्य षष्ठेव दृशो व्यापारसामान्यवाचित्वं लभ्य
लभ्यते न च कर्तुराख्यातार्थत्वा वादिमते आख्यातार्थाश्रयप्रकारकबोधं प्रथमान्तपदजन्योपस्थितिर्हेतुस्तदर्थ
सङ्ख्याप्रकारबोधेन तदर्थाश्रयपदज्ञानं हेतुस्तदर्थकालप्रकारकबोधे धातुजन्योपस्थितिर्विपस्थितिर्हेतुरित्यनेककार्य
कारणभावस्वीकारैः प्रकृतस्यार्थकर्तावादिमतेऽनुकालेऽपि साधनत्वाघतिरिक्ताख्यातार्थप्रकारकबोधे प्रथमा
न्तपदजन्योपस्थितिर्हेतुरिति सङ्ख्याभावनयोरेकरूपेणैव तिसाद्यत्वमिति वाच्यम्॥ आख्यातत्वावघ्मानत्वेह
शकार्यकारणभावग्रहासम्भवात्. किन्तु क्वचित्प्रकृतिबोधं प्रति आख्यातजन्योपस्थितिर्हेतुः क्वचिदाश्रय
बोधम् प्रति आख्यातजन्योपस्थितिर्हेतुः क्वचिदाश्रयबोधं प्रति आख्यातजन्योपस्थितिर्हेतुः क्वचित्प्रकृति
बोधं प्रति धातुजन्योपस्थितिर्हेतुः क्वचित्तनत्वैवमस्य यजन्योपस्थितिर्हेतुरित्यनन्तकार्यकारणभावापत्तेः

© Dharmartha Trust J&K. Digitized by eGangotri

यद्यपि रथो गच्छतीत्यादावाश्रयत्वे लक्षणेति तद्यपि न गमनिरूपिताश्रयत्वेन रथनिष्ठेन कृतेः सम्बन्धाभावात् परं
परासंबन्धस्य तुल्यत्वाल्लक्षणानियामकत्वाभावात् तत्संबन्धज्ञानपूर्वकबोधस्याननुभवाधीनलक्षणेति तन्नासंको
चेपाताभावादुक्तनियामकस्य सुस्थितेः विभक्तिसाधारण्यादित्तिदिक् एवं नैयायिकमतं निराकृत्य प्रकृतानुगुणत
यातदेकदेशिमतसाधारणमिश्रमतं निराकरोति किंचेति भावनायाः व्यापारस्य त्र- वाच्यत्वे धात्वा वाच्य
त्वे फलमात्रं धात्वर्थो भावनाख्यातार्थ इति हि तन्मतं तथा च घटं भावयतीत्यादौ णिजर्थव्यापारजन्योत्पत्तिरूपधा
त्वर्थफलाश्रयत्वात् घटे द्वितीयोत्पत्तिवदाख्यातार्थव्यापारजन्योत्पत्तिरूपधात्वर्थफलशालित्वात् घटे भव
तीत्यावपि द्वितीयोत्पत्तिर्मन्मते तु धात्वर्थव्यापाराश्रयत्वेन पनुयाकर्तृकैसंज्ञया बाधान्न द्वितीया एषैव रसकर्म
केषु सर्वत्र गतिः अनुगतकर्तृत्वस्येति अस्मन्मते प्रकृतधातूपात्तप्रधानीभूतव्यापाराश्रयत्वस्यैवस्यर्थः क

© Dharmartha Trust J&K. Digitized by eGangotri

स०भू०टी० नकमात्रातिव्यापकत्वादिति अन्यथासौकर्यातिशयद्योतनायकाष्ठस्थाल्यादेर्व्यापाराश्रयत्वविवक्षायां काष्ठ
19 स्थाल्यौ पचतीतिप्रयोगानापत्तेरितिभावः नन्वाख्यातार्थव्यापाराश्रयत्वं तत् घटो भवतीत्यादौ च तदाश्रय
त्वेन कर्तृसंज्ञया बाधान्न द्वितीया न च भवतीत्यादौ करोतिनाविवरणाभावान्नाख्यातस्य भावनावाचकत्व
मिति मीमांसकोक्तेः कथं तदाश्रयत्वेन कर्तृत्वमिति वाच्यम् एवमप्यत्राख्यातस्याश्रयमात्रयतत्वेन धात्वोर्थेव फल
समानाधिकरणवाचकत्वेनाकर्मकत्वासिद्धान्तइव तदाश्रयत्वेन कर्तृत्वान्न द्वितीयेति यदं भावयतीत्यादौ
चणिवर्थव्यापाराधिकरणे धात्वर्थफलाश्रयत्वाद्द्वितीया न यात्रैव हेतुमति चेति शास्त्रबलात् प्रयोजक
व्यापारस्य णिजर्थत्वेपि आख्यातार्थव्यापाराश्रयत्वेन कर्तृत्वात्सनत्वात्तृतीयापत्तिरिति वाच्यम् णिस्समभिता
नेफलसमानाधिकरणाख्यातार्थव्यापाराश्रयस्यैव तत्त्वमिस्याशयादिति चेन्न आख्यातार्थव्यापाराश्रयत्व

© Dharmartha Trust J&K. Digitized by eGangotri

मित्यत्र णिजन्निधाने किं प्रयोजकनिष्ठव्यापारस्याख्यातार्थत्वम् विवक्षितमुत प्रयोज्यनिष्ठव्यापारस्य नाद्यः पा
चयति देवदत्तो विष्णुमित्रेणेत्यादौ विष्णुमित्रस्य प्रयोज्यस्य कर्तृतापत्तौ कर्तरि तृतीयानापत्तेः ॥ णिचानस्याक्
त्वेन पुनराख्यातार्थत्वे मानाभावाच्च न च णिचो द्योतकत्वमिति वाच्यम्। घोसार्थस्य विशेषणत्वापत्तौ दोष
स्य वक्ष्यमाणत्वात् घटं भावयतीत्यादौ घटे कर्तृतायाः स्वावन्मात्रेणैव वर्णनेन नफलासमानाधिकरणेति विशे
षणत्वैप्यर्थापातात्त् नान्त्यः घटं भावतीत्यादावपुंसविशेषणत्वहाने न दोषः वानणेपि गुरुः शिष्याभ्यां पाचयतीत्या
दौ संख्यायाः स्ववाचकाख्यातार्थव्यापारान्वयित्वेवान्वयनियमेन शिष्याभ्यामिति द्विवचनानापत्तिः पाचयती
त्यादावेकवचनानापत्तिश्च गुणेनानभिधाने न प्रथमानापत्तिश्च शिष्यशब्दात् प्रथमापत्तिश्च विशेषणत्वा
नेगौणत्वस्य कल्पनेनुपत्तिको वाचकत्वात् प्रधानीभूतणिजन्तधात्वर्थव्यापाराश्रयत्वस्य प्रयोजके सत्वात्

© Dharmartha Trust J&K. Digitized by eGangotri

स्यकर्तृत्वं तस्य च तिया ऽभिधानं प्रयोजकान्तर्नीया प्रयोज्यस्य तु धातुभेदान्न णिच्प्रकृतिपच् धात्वर्थप्रधानीभू
तव्यापाराश्रयत्वात्कर्तृत्वं तस्य च तिया अनभिधानं तृतीया एवमेव घटं भावयतीत्यादावपरमकर्मकत्वेन भूधा
तोर्गतिबुद्ध्यादीत्यनेन द्वितीयेति विशेषः न चाणिचः प्रेरणाद्योतकत्वेन द्योत्यविशेषणत्वेन कथं प्रयोज्यधात्वर्थ
प्रधानीभूतप्रवर्त्तनारूपव्यापाराश्रयत्वेन प्रयोजकस्य कर्तृत्वमिति वाच्यम् भाष्यप्रामाण्येन णिचो वाचकतया
तदर्थस्यापि विशेष्यत्वात् अन्यथा तदाश्रयणे प्रयोज्यस्य कर्तृत्वानापत्तौ प्रयोजकस्य कर्तरि लाद्यनापत्तिः
द्योत्यस्य विशेषणत्वमेवेति नियमभङ्गो कृत्य द्योत्यत्वेऽपि विशेष्यत्वाङ्गीकारेण गमितो ग्रामं देवदत्तो यज्ञदत्तेने
त्यादौ प्रयोजकव्यापारस्य गमिवाच्यत्वात् प्राधान्येन गमिवाच्यत्वाच्च प्रयोजककर्तरि क्तस्यापत्तिः पाचयति दे
वदत्तश्चैत्रेणेत्यादौ प्रधानीभूतव्यापाराश्रयत्वेन प्रयोज्यस्य कर्तृत्वानापत्तिश्चेत्यलम्॥ अग्रे व्याख्यास्ये।

© Dharmartha Trust J&K. Digitized by eGangotri

धात्ववाच्यत्वे। स्वार्थेति व्यापारस्य धातुवाच्यत्वाभावादिति भावः। विनिगमनाविरहाद्धा ह स्वार्थव्यापारेणेति नचदे
वदत्तो जीवति सतीत्यादावतिव्याप्तिः व्यापारव्यधिकरणप्राणधारणमात्रविषयादिरूपफलवाचित्वादिति वाच्य
म्। फलाश्रयावाचकत्वे सतीति विशेषणान्नेषां प्राणगमनादिरूपफलाश्रयवाचकत्वात्। नच विवक्षितकर्मस्व
तिव्याप्तिः अविवक्षाविरहविशिष्टत्वेन फलस्य विशेषणात्। स्वत्वनिवेशेन यद्यप्यननुगमस्तथापि यं कञ्चने
कं सकर्मकं स्वशब्देनोपादाय सकर्मकत्वव्यवहारः कार्य इत्यदोषः। वस्तुत एतद्धननाय फलाश्रयावाचकत्वे
सतीति विशेषणदाने गौरवं अविवक्षाविरहविशिष्टत्वेन फलविशेषणमपि दुष्टं गौरवात्। अर्थभेदेऽपि श
ब्दैक्यमिति मते विशेषणदानेऽपि घटं करोतीत्यादौ घञ्चिदविवक्षाविरहविशिष्टफलवाचकत्वेन ननत्वप्रसक्तमिश्र
याकर्मत्वेऽविवक्षादशायामपि अतिव्याप्तेश्च यत्र त्वर्थभेदाच्छब्दभेद इति मते स धातुर्भिन्न एवेत्युक्तने

ल.भू.टी. तदा विशेषणत्वेनान्वयार्थमेवार्थान्तरवृत्तित्वेनैवाकर्मकत्वात् एतेनाविवक्षितकर्मसु फलानियमात्तदर्थकाअ
निरस्ताः एवं धात्वर्थस्य यास्तम् धातोरर्थान्तरे वृत्तेरित्यादि भाष्यकारिकायामविवक्षातइत्यस्य पृथगुपा
दानवैयर्थ्यं च । धातोरर्थान्तरे वृत्तेरित्यनेनैवाकर्मकत्वे संपन्ने ः नन्वेवं तस्य लक्षणत्वे स्वदुष्टत्वे किं न स्वस्य लक्षणमि
ति चेन्न अस्याद्यशास्य फलव्याप्यान यो नैकेति कारिकायामग्रे वक्ष्यमाणत्वादित्यग्रहणे अन्यतमत्वमि
ति सकर्मकधातून्तत्त्वमित्येनोपादापतनाभिन्नत्वरूपमन्यतमत्वं सकर्मकत्वेवाच्यमित्यर्थः एकस्यैवेति
यथा रवदधातुः स्थैर्ये अकर्मको हिंसायां सकर्मको दृष्टः एतत्पक्षे चोभयत्राप्यर्थे सकर्मकतापत्तिः स्यादिति स
र्थविशेषान्तर्भावेनैव सकर्मकत्वाकर्मकत्वे निर्विवेकस्य इति बोध्यम् अकर्मकता सकर्मकता वास्यादिति व्या
पारस्य धात्ववाच्यत्वे निरुक्तसकर्मकाकर्मकलक्षणयोः स्वार्थत्वघटितत्वासंभवेन व्यापारस्यमधिकर

© Dharmartha Trust J&K. Digitized by eGangotri

ण फलवाचकत्व व्यापारसमानाधिकरणफलावाचकत्वयोर्नैवनत्वेनयत्किंचिद्व्यापारमादायसर्वस्या
धात्वर्थफलस्यतत्त्वे न सर्वेषां धातूनामुभयविधत्वापत्तिरित्यर्थः एवमप्यवेतिवक्ष्यमाणेफलस्यधात्ववाच्यत्वकल्पे
पित्स्वार्थत्वाघटितिरिति फलसमानाधिकरणव्यापारवाचकत्वफलव्यधिकरणव्यापारवाचकत्वरूपयोरेवनयोःसं
भवेनोक्तरीत्यापत्तिरिति फलमादायधात्वर्थव्यापारस्य तत्त्वे न सर्वेषां तत्त्वापत्तिरपि बोध्या वाशब्दश्चार्थे यद्वा
ऽथवेति पक्षमादाय वैविकल्प्येनाभिहितमिति बोध्यम् पूर्वं धातोः केवलफलवाचकत्वनिराकरणपरतया व्या
ख्यातं मूलमिदानीं केवलव्यापारवाचकतानिराकरणपरतया व्याचष्टे अथवेति तत्र वाच्यत्वं व्यापारावेति
व्यापार एव धात्वर्थः फलं तु कर्मप्रत्ययार्थः फलाश्रयत्वादेव कर्मणः प्रकृत्यर्थस्य च लितत्वसंबन्धेन फलेऽन्वय इ
ति तन्मतमिति भावः छेदापत्तिरिति फलस्य धात्वर्थत्वाभावादिति भावः भ्रान्त इति भट्टपादानुयायिना हतोभ

© Dharmartha Trust J&K. Digitized by eGangotri

मू०टी० क्रोगौण इत्यर्थः नैयायिकमते सविषयार्थकधातुयोगे विषयत्वं द्वितीयार्थः सविषयार्थकत्वमेव गौणसकर्मक
त्वमिति भावः ॥ यत्नमात्रमिति ॥ व्यापारस्थानीयत्वेनेति शेषः ॥ पुनरयत्नमिति ॥ सकर्मकाकर्मकविभागोच्छेद
नूपयुज्यपेक्षयात्रान्यां युक्तिमित्यर्थः अन्यथा यत्नमात्रवाचकत्वे ॥ तन्न स्यादिति ॥ कर्मस्थभावकाधातादिवि
धेः कर्मावस्थायां या क्रिया कर्त्रवस्थायां सैव चेत्तदैव यगादयो भवन्ति छतिरिच्यन पटादिकर्मनिष्ठेति भावः ॥ दर्शि
नस्य घटाद्यवृत्तित्वादिति ॥ समवायसम्बन्धेनेत्यभिमानः ॥ वस्तुतो विषयतासमापाभ्यां ज्ञानस्योभयवृत्तित्वात्
कर्तृस्थक्रियकत्वेन कर्मवद्भावानापत्तेस्तथा प्रयोग इत्यग्रे वक्ष्यामः ॥ निर्वर्त्यमिति ॥ वक्ष्यते इति ॥ यदसज्जाय
ते सद्वा जन्मना यत्प्रकाशते ॥ तन्निर्वर्त्यं विकार्यं तु द्वेधा कर्मव्यवस्थितम् ॥ प्रकृत्युच्छेदसम्भूतं किञ्चित्काष्ठा
दिभस्मवत् ॥ किञ्चिद्गुणान्तरोत्पत्त्या सुवर्णादिविकारवत् ॥ क्रियाकृतविशेषाणां सिद्धिर्यत्र न गम्यते ॥ दर्शना

© Dharmartha Trust J&K. Digitized by eGangotri

दनुमानाद्यास्वाद्यमितिकथ्यतेइतिवाक्यपदीयोक्तेर्निनस्वस्वलानि॰ घटंकरोतिसोमंसुनोतिविरूपंपश्यतीत्याद्दी
सुहातनलानि च वस्यन्तेइत्यर्थः॥ स्पष्टश्चैतेति। यथाहि याकादिभिस्तं दुःखादौ विशेषोभवतीनैवं गमनादिना
ग्रामादौ विलक्षणप्यं सुबर्थनिर्णये वक्ष्यामः। उपलक्षणत्वेपीति॰ संयोगादिफलक्षितव्यापारो गमधात्वर्थो
विभागोपलक्षितव्यापारस्त्यजधात्वर्थ इतिरीत्येतिभावः। वर्तनीत्यनेन तत्तत्फलबोधेनतत्तद्धात्वनुसमभिव्या
हारस्यनियामकत्वान्नदोषइत्यस्यघनसंसूचितः। निर्विवादमेवेति॰ ओदनंपचतीत्यादौ सकर्मकस्थले फलस्यद्वि
तीयार्थत्वं संभवेदपि पचतीत्याद्यकर्मकस्थले तु सत्त्वादिरूपफलवाचकत्वमनायत्या धातोरेव वाच्यमितिभाव
ः अतएव उभयार्थकत्वादेव द्व्यर्थःपचिरिति। वस्तुतस्तु विक्लेदनानि वर्तनाच पचेरर्थः पचतीत्यस्य तण्डुला
न् विक्लेदयन्नोदनं निर्वर्तयतीत्यर्थात् तथा चैतद्राष्ट्रं विक्लेदनोपसर्जननिष्पादनापरमिति बोध्यम्॰ सा

© Dharmartha Trust J&K. Digitized by eGangotri

स·भू·टी·
23

यविंशत्यादित्ति· प्रत्ययार्थः प्रधानमिति न्यायादाख्यातार्थ एव भावेनेति भावः तदागमे हि स्येति· तस्य प्रत्ययस्य आगमेऽपि व
लो हि यतः सा भावना दृश्यते प्रतीयतेऽतः सा प्रत्ययार्थ इति भावः· अयश्च माषीत्ते मिति भोक्तः शब्दबलमप्यनुभूयते न
ह्यागमे हि दृश्यते तस्य ज्ञानं यथा न्येषामिति सूचितं तद यश्च शब्दवन्तं शब्दबाध्यं यथा भवति न था एकत्वमुपलभ्य
ते हि यस्तदागमे एकवचनस्यागमे न दृश्यतेऽन्तस्तस्यांगत्वज्ञानं यथान्येषां विशेषाणां पशुत्वादीनामिति य
शुनायजेतेत्यादेएकत्वशिष्टपशोर्विधेयत्वे एकत्वस्यापि एकवचनरूपशब्दबोध्यत्वेन तस्य च पशुद्वारा या
गोपकारकत्वेन पशुत्वादिवद्यागान्वितेति परमार्थ इति संख्याविवक्षाऽविवक्षानिर्णये वक्ष्यामः। तन्नाधा
न्यमागमे आगमानुक्तस्यार्थे दृश्यते इत्यसमर्थ इत्यपि केचित्· एततस्यैतेनैव दृहितः पाठः। एवञ्च स्वपुमेति·
संधातुस्तघुक्तंपदाख्यातं तत्रस्थैत्यर्थः स्वपुमेति विशेषणोपादानं भूधातोरपि पठ्न्ति ह्याख्यातार्थमादाय त

धाग

© Dharmartha Trust J&K. Digitized by eGangotri

अधिकरणफलवाचकत्वेन सकर्मकत्वापत्तिवारणार्थम्· भट्टैः सर्वत्र फलव्यापारयोर्धातुवाच्यत्वं स्वीक्रियते
स च व्यापारः सिद्धवस्थापन्नः इत्यसम्मतम् । न तु केवलस्य फलस्येत्यभिप्रेत्याह· मीमांसकमन्यमिति· अभिप्रायस्य
हेतुमेवाह· फलमात्रस्येति· अन्ययत्वादिति· संयोगस्य गमधात्वर्थत्वात्· गमनस्य च ग्रामे ऽबाधितत्वादित्य
र्थः· तस्यानापत्तेरिति· पचधात्वर्थस्य पाकरूपफलस्यावर्तमानत्वादित्यर्थः· एवमग्रेऽपि· व्रजादेनिति· पाक
रूपस्याद्यावित्यर्थः वाचकत्वादिति कर्त्तरि शबित्यिति सूत्रस्य कर्तृपदस्य कर्तृत्वपरत्वेनानेनैव व्यापारे व्रजादे
र्विधाधानादित्याशयात्· अनुशासनवैयर्थ्यापत्तेरिति· आख्याते ऽतः कर्मणीत्यत्रानुवर्तमानकर्तरीत्य
स्य कर्तृत्वपरत्वमादाय तदवच्छेदिकायां क्रियायामित्यर्थस्य यापगतस्तस्यैवार्थाधिकारानुरोधेन फलस्य
पर्यन्तमतया व्यापारार्थकत्वात्का भेन भावे इति सूत्रं व्यर्थमिति भावः· लः कर्मणि च तत्र भावे तिङ् विधाय

© Dharmartha Trust J&K. Digitized by eGangotri

त·भू·टी·
24

कभावे इत्यंशस्याप्युक्तरीत्या वैयर्थ्यं बोध्यं· तन्भाष्यविरोधापत्तेश्चेति· धातोऽफलवाचकमिति वदतस्त
न्मते साध्यावस्थापन्नधात्वर्थभावापेक्षया घञादेरतिरिक्तसिद्धावस्थापन्नभावार्थबोधकेन सिद्धावस्था
पन्ने धात्वर्थे घञिति भाष्येण विरोधश्चेत्यर्थः· अत एवाकर्त्तरि च कारके इति सूत्रे भाष्ये कारकग्रहणं किम
र्थमिति प्रश्नेऽनिर्दिष्टार्थत्वात्स्वार्थे माभूत् स्वार्थश्च धात्वर्थ इत्यभिधाय धात्वर्थे भावे भावे इति पूर्वसूत्रेणैव
सिद्धमिति सामर्थ्यात्कारक एव भविष्यतीति पुनस्तद्वैयर्थ्यमापाद्य एवन्तर्हि साध्यावस्थापन्ने धात्वर्थे माभू
त् भावे इत्यत्र साध्यावस्थापन्नो धात्वर्थो निर्दिष्ट इति तेन न सिद्धिरिति कारकग्रहणं कार्य्यमित्युक्ता कर्त्तनीति
पर्युदासेन नञ्त्वाभेन नत्वस्याख्यातं। धातोर्नेव व्यापारो वा भानप्रत्ययस्येति शंकते· अथेति· सकलव्यापारे
ति· यन्नाभिमतभावनारूपव्यापारस्यापि लाभसम्भवादित्यर्थः। तदपि। विनतेणमपि· मीमांसकोक्तं बाधक

© Dharmartha Trust J&K. Digitized by eGangotri

मिति॰ अस्ययार्थः प्रधानमितितदागमे हीति च न्यायविरोधनूपमित्यर्थः अनुणाधिकनणेरीत्येति॰ अनुणेक
हापिम्नापि ज्ञास्यागवासोमंत्री णतीति वा वधोयात्तस कर्म कान कारांत्रियस्यैवान्वयः पश्चात्तु विशेषणवि
शेष्यभावेन मानस्यावोध इतितदधिकनणेरीत्येत्यर्थः अतएव वकरोपि कर्मभीष्मादयोपि कर्मेति भाष्यसंगतं
ते॰ वक्ष्यमाणस्य द्रीत्येति॰ क्रियान्वयिनामेव कानकत्वमित्यादिवक्ष्यमाणस्य द्रीत्येत्यर्थः अन्वयासंभव इति॰
पनस्य नमन्वयासम्भव इत्यर्थः प्राधान्येति॰ प्रकृत्यर्थनिरूपित प्राधान्येत्यर्थः। द्रव्य इति॰ विशेष्यतयेत्या
दिनीत्यस्यार्थः न च संवन्धमात्रमिति॰ ज्योतिष्टोमेन स्वर्गकामो यजेतेत्यादावाख्यातार्थभावनायां स्वर्गकामो
पदोपात्तः स्वर्ग एव भाव्यत्वेन सम्वध्यते ननु समानपदोपात्तो पि धात्वर्थो यागस्तस्यासुखरूपत्वेनापुरुषार्थ
त्वेनानुद्देश्यत्वात्॰ न च भिन्नपदोपात्तत्वं रूपवाक्यापेक्षयाऽऽख्यातपदरूपसमानपदश्रुतेर्वलवत्वाद्धा

© Dharmartha Trust J&K. Digitized by eGangotri

न्या.भू.टी. गस्यैव भाव्यत्वमुचितमिति शेषः। भावनायाग संबन्धिनीत्येवं संबन्धसामान्यं प्रतिपाद्यैव समानपदश्रुतेश्चा
१ 25 रितार्थ्यादिति भावार्थाधिकरणे भट्टपादैः सिद्धान्तितत्वात्. उक्तकारिकास्वरार्थश्च धात्वर्थभावयोः सिद्ध
साध्यावस्थापन्नयोः सम्बन्धमात्रमुक्तमिति पदेन विशेषनिरासः प्रसुता. समानपदश्रुत्या। तस्य संबन्धसामा
न्यस्य एकांशः संबन्धविशेषः करणत्वादिस्तस्य निवेशे तु बाधने तु व्यवस्था; समानपदश्रुतेर्व्यापारः सामर्थ्य
न्नास्ति तत्कारणे आकांक्षाविरहात्. कुतश्चाकांक्षाविरह इति चेन्न. भावनाया अप्रवृत्तप्रवर्तकत्वा
नुबोधेन फलान्वितायाएव वचनत्वाकांक्षित्वात्. अतएव पचतीत्यत्र पाकसंबन्धिनी भावनेत्येवंबोधो ता
र्थः पाकानुकूलाभावनेति मानसः पश्चाद्बोधः। अतएव दर्शभावनुहोतीत्यादौ होमसम्बन्धिभावना न पारदृष्टि
संस्कुर्यादित्यर्थः। अतएव च ज्योतिष्टोमेन यजेतेत्यादावपि ज्योतिष्टोमाभिन्नयागसम्बन्धिभावनेति प्रत्यो

© Dharmartha Trust J&K. Digitized by eGangotri

तौऽर्थः पार्ष्ठिकस्तु होमयागादेः करणत्वबोधः नासाधितं करणं भवतीति न्यायेनार्थाक्षिप्तहोमयागसाधक
भावनामादाय होमयागादेः सिद्धत्वादिति । तत्रान्ये आह । अजेति । आधेयप्रधानीभूताया अजायाः प्रत्ययार्थत्वा
पत्तिरूपो दोषः स्यादत एवेति नोक्तः प्राधान्यापत्तेरिति । अजेत्यादौ स्त्रीत्वप्रकारकाजादिविशेष्यकबोधस्यैवानुभ
विकत्वादिति भावः । वस्तुतः स्त्रियामितिसूत्रे भाष्ये स्त्रीत्वस्य प्रत्ययार्थत्वपक्षे प्रकृतिप्रत्यययोरिति न्यायेन प्रधान
स्य स्त्रीत्वस्य असत्त्वभूतत्वात् स्त्रीप्रत्ययप्रकृत्यर्थस्य संख्यायाः स्ववाचकप्रकृतिविशेष्यार्थान्वयित्वनियमाच्च
द्वित्वाद्यनन्वयेन द्विवचनाद्यनुपपत्तिमाशंक्याप्रधानस्यापि स्त्रीत्वस्य प्रकृत्यर्थद्रव्येणाभेदसंसर्गेण समाहि
तं न तु प्रकृत्यर्थं प्रति विशेषणत्वाश्रयणेन । तथा च स्त्रीत्वस्य प्राधान्येऽप्युपपत्तौ प्रकृतिप्रत्ययार्थयोरिति सू
त्रे व्यभिचारः स्त्रीत्वस्य स्त्रीप्रत्ययार्थोऽस्तु सत्त्वपक्षे तु घोः सार्थ्यानां विशेषणत्वनियमेन विशेषणतीत्युक्तं

© Dharmartha Trust J&K. Digitized by eGangotri

वै.भू.टी.
२८

अतएवसूत्रे कृञ्चापि प्रत्ययार्थस्याप्रमाणत्वादित्येवाह न तु व्यभिचारित्वादित्यपि। तस्याव्यभिचारित्वेनोत्सर्गत्वेन युक्तं।
कथं तर्हि पचतीत्यादौ कर्त्रादेः प्रत्ययार्थस्याप्राधान्यमिति चेदुच्यते। प्रकृतिप्रत्ययार्थयोः प्रत्ययार्थः प्रधानमित्ये
तत्र प्रत्ययस्य वाचकतानतद्विषयं। प्रकृतिप्रत्यये तद्विरुद्धनिर्देशस्य प्रकृतीत्यंशस्य येन वाच्यतासंबन्धेन द्वन्द्वा
न्वभूयमाणार्थपदेन संबन्धस्तेनैव संबन्धेन प्रत्ययेऽपि शक्तापि तत्रान्वय एव साधुत्वात्। किञ्चास्य प्रत्ययद्यो
त्यार्थप्राधान्यबोधकत्वे द्योत्यार्थस्य विशेषणतया एव भाष्यसिद्धत्वाद्वक्ष्यमाणतया मात्रस्योक्तिसंभवानापत्तेः
तथा च तिङ्कृत्त्वाद्दीनां धात्वर्थतास्वीकारेणाऽनेन तिङन्तं द्योतकतया द्योत्यार्थकत्वादिविशेषणतायाएवयुक्त
त्वात् नन्वायविषयताकर्तरि ल्युडित्यादेः कर्तृविषयाद्युतोऽरित्येवार्थः। भावेइत्यादेः सत्वस्य तथान्वयस्यैव तत्वाप्या
वश्यकत्वात्। भावस्य धातुलभ्यत्वेन प्रकारान्तरस्यासंभवात्। अतएवानुक्रमोऽरिति सूत्रे भाष्ये भावकर्मणोरि

© Dharmartha Trust J&K. Digitized by eGangotri

तिसूत्रस्यभावकर्मर्त्तृत्वाद्धातोरित्यर्थकथनंकृतं·तस्यचभावकर्मविषयाद्धातोरित्यर्थंकैयटआह·तद्विषयत्व
ञ्चधातोःकर्त्तृकर्मादिविशिष्टक्रियावाचकत्वेनकर्मादीनांस्वप्रकृतिप्रत्ययवाच्यत्वेनवातत्रतिङ्विषयकत्व
कारस्यत्वेऽप्यास्यंक्रियाप्रधानमाख्यातमितिस्मृत्संन्तरात्·शब्दादिविषयेत्वन्यम्सत्वप्रधानानिनामानीत्यु
क्तेः·लः·कर्मणिचेत्यादेरपिभावकर्मकर्तृताद्धातोर्लइत्येवार्थः·अतएवचेह्कयोनिस्यादीनांतिङ्विषयाणा
मपिनियामकत्वंभाष्योक्तंसंगच्छतेसिद्धेचकैमथ्यार्थान्नियमोभवति।संख्यादीनांधातुवाच्यत्वेचानिर्दिष्टार्थाः
प्रत्ययाःस्वार्थेभवन्तीतिन्यायेनसामान्यसूत्रेणैवसर्वत्रार्थेतिवादिसिद्धेनियमत्वंयुज्यतेनान्यथा।धातुवा
च्यत्वादेवचत्रजर्थान्नचकाइत्यादेधातुमात्रात्सर्वबोधः·स्तुतस्मरणात्बोधइतितुनसम्यक्·लोपमता
नन्तोबोधानापत्तेःसार्वधातुकेपगितिसूत्रस्यस्यसार्वधातुकार्थाःकर्त्रादयइत्यस्यतद्धात्वाइत्येवार्थः।

© Dharmartha Trust J&K. Digitized by eGangotri

ल·भू·टी· 27

एवं द्वे विकरणार्था इति पक्षे विकरणद्योत्यास्त्र्यपीत्यर्थः । न चैवं विकरणार्था इति पक्षे तेनाभिधानाद्विकरणेन स्यादिति
भाष्यस्य शंकानुपपत्तिर्द्योतकसमुच्चयस्य व्यतिलुनीते गार्ग्यायणीत्यादौ दर्शनमुक्तार्थानामिति न्यायस्य वाचक
विषयत्वादतो लवनस्य वाचकत्वमास्ते सोक्तार्थानामिति न्यायेनैव शंकोक्तिः पुंक्तिति वाच्यम्। लिङ्। लिटो विकर
णहीनयोरद्यारोचलकानमात्रेणापितद्योतनेऽप्यापिते नैव कृतकृसन्तया विवरणानुत्पत्त्यापत्तिरित्याशंकाशा
यात्। उक्तार्थानामिति न्यायोऽपि द्योतकविषयेऽपि प्रवर्त्तत इति स्पष्टमन्यत्र वक्ष्यते वाचो व्यतिलुनीते गार्ग्यायणी
त्यादौ तु नात्मनेपदमात्रेण कृष्णमात्रेण च कर्मव्यतिहारस्योक्तत्वाद्विबोधनमन्यत्रापितयोऽस्य त्वादतस्तत्समुच्च
यः । उक्तराशायस्तु शब्दशक्तिस्वभावात् क्वचिद्द्विवचनसहितस्य तद्योतकत्वम् क्वचित्केवलशार्वधातुकस्यापी
ति। तस्माद्भावकत्वभावकालवाचकसंख्याः धातोरेवार्था इति सिद्धं अत एव पञ्चकं नामार्थ इत्येतेन नावैषम्यमपि

© Dharmartha Trust J&K. Digitized by eGangotri

तस्माद्वाचकविषयायाः प्रकृतिप्रत्ययार्थयोरितिव्युत्पत्तेः प्रसङ्ग एव नेति बोध्यम्॥ कोयो व्युत्पत्त्यनुसारी ननु बोधानु
सारी लीव्युत्पत्तिरित्याह · किं त्विति · व्युत्पत्त्यनुरोधादिति · पर्यायगवङ्गादौ विशेष्यतासंबन्धेन प्रकृत्यर्थप्रकारकबोधं
प्रति विषयतया तदुत्तरप्रत्ययजन्योपस्थितिर्हेतुरिति कार्यकारणभावानुरोधादित्यर्थः। शक्यतावच्छेदकप्रकार
केति · गङ्गायां घोष इत्यादि लक्षणास्थले शैत्यपावनत्वादिरूपप्रयोजनप्रतीत्यर्थं तीरे प्रवाहत्वप्रकारकबोधे प्रवाहत्वेनैव
तीरबोधः स्यात् नैकारिकैरङ्गीकारादिति भावः। कथं तस्य नीत्यादौ चैतेषां मते दोषजन्यत्वादिति ॥ प्रयोक्तिपरिणा
मरूपसंकोचालंकारस्वीकारे को दोषादिति · नन्वेवमपि कादीतामिति · लक्षणाविषये शक्यतावच्छेदकप्रकार
कबोधाङ्गीकारे कवतस्तस्य निवदनं वदनात्कुचमण्डलं त्रसति। मध्याद्विभेति नयनं नयनाद्धनः समुद्विजतो
सादौ कचत्वमुखत्वादिना राहुचन्द्रयोर्बोधे लक्ष्यतावच्छेदकीभूतराहुत्वादिना बोधाभावात् · त्रासकत्वानुपप

© Dharmartha Trust J&K. Digitized by eGangotri

स॰भू॰टी॰ त्वल्लक्ष्यतावच्छेदकप्रकारकएव बोधः स्वीकार्य इति भावः वस्तुतस्तु तदवच्छिन्नेशक्ततावच्छेदकारोपो लक्षणे

२८ ति सिद्धान्तमते वक्तृत्वेन राकृत्यावच्छिन्नबोधान्न काचिदनुपपत्तिः विपर्ययेणापि व्युत्पन्नानामिति॰ अव्युत्पन्ना

नामित्यर्थः व्युत्पन्नत्वञ्च व्याकरणशास्त्रोक्तप्रकृतिप्रत्ययविभागतत्तदर्थविभागतत्तदन्वयबोधविषय

कज्ञानवत्त्वं तद्भिन्नानामित्यर्थः अथवा विपरीतप्रयोज्यप्रयोजकवृद्धव्यवहारतो व्युत्पन्नानामित्यर्थस्तथाहि । द्वि

तीयाद्यभिधेयकर्मत्वादीन् कर्मत्वादिशब्दैरेव बोधयितुं वाञ्छता केनचित् व्याकरणाभिज्ञेन प्रयोजकवृद्धेन प्रयुक्तं

घटः कर्मत्वमानयनं कृतिरिति वाक्यं श्रुत्वा येन प्रयोज्यवृद्धेन व्याकरणालक्षणेनार्थानुसंधानपूर्वकं घटीयाकर्मते

सर्थं भवतम्म घट आनीतस्तदीयघटानयनं पश्यतो बालस्य नूनमस्मिन्नर्थे इदं वाक्यं शक्तमिति शक्तिग्रहः साका

ङ्क्षजायग्रहश्च भवतीति भावः एवन्दिशा व्युत्पत्तिरपि व्याकरणव्युत्पत्तिमतामेव भवतीत्यपि शव्दनुपात्तः। नन्निराका

© Dharmartha Trust J&K. Digitized by eGangotri

ङ्क्षामिति। घटीयाकर्मतेति बोधेनान्विताकाङ्क्षमित्यर्थः। यस्य पदस्य यत्पदव्यतिरेकप्रयुक्तान्वयाननुभावकत्वं तत्
स्य तेन सह त्वमाकाङ्क्षा अभेदबोधे समानविभक्तिकत्वमेवाकांक्षा नीलं घटमानयेत्यादौ नीलपदं विनापि घट
मानमेत्यन्वयदर्शनात् घटं कर्मत्वमित्यादौ त्वभेदबोधीयाकाङ्क्षासत्वेपि योग्यताविरहान्नाभेदबोध इति। वस्तु
नः तात्पर्यविषयीभूतसंसर्गावृत्तिधर्मसंसर्गतावच्छेदकसंबन्धिनिष्ठात्यन्ताभावप्रतियोगितावच्छेदकत्वा
भावरूपयोग्यताज्ञानं न बोधे कारणं तेनापि तादृशप्रतियोगितावच्छेदकत्वरूपायोग्यतानिश्चयः प्रतिबन्ध
कः। वन्ध्यासुतो याति वह्निना सिंचतीत्ययोग्यादपि बोधदर्शनात्। कथमन्यथैतद्वाक्यप्रयोक्तुरयमेव वह्निना कथं
सेक्तुमिच्छतीत्युपहासः श्रोतृभिः क्रियमाणः सङ्गच्छते। न चैतदयोग्यवाक्यश्रवणानन्तरं श्रोतृणामर्थोपस्थितिमा
त्रं न शाब्दबोध इति वाच्यं। सर्वत्रैवमेवापत्तेः न चैवं वह्निना सिञ्चेदितः शाब्दबोधे प्रवृत्तिरपि स्यादिति वाच्यम्। वा

© Dharmartha Trust J&K. Digitized by eGangotri

त॰भू॰टी॰ धत्तानेनैवायोग्यतानिश्चयेन ज्ञातबोधेः प्रामाण्यशंकाजननात् तदनास्कन्दितज्ञानस्यैव प्रवृत्तिजनकत्वात्॰ तेन
२१ श्च घटः कर्मत्वमित्यादिदितो बोधेऽपि सघुसन्नस्य तत्कार्यप्रसक्तिस्तद्बोधेः योग्यतानिश्चयेनाप्रामाण्यजननात्॰
पनमार्थतस्तु समभिव्याहृतजननसामर्थ्यत्वं योग्यता शा च शाब्दबोधे भासते ऽत एव घटेन जलमाहरेत्यादौ सछिद्रे
तरस्यैव जलाहरणसामर्थ्यवत्वेन सछिद्रेतरत्वप्रकारबोधः अत एव प्रातिनिधेः श्रौतत्वोपपत्तिः। यथा खादि
नोपयोगाभवतिरवादिरे पशुमव ध्रातीत्यादावस्यातन्त्र्याफलकसंयोगविशेषवत्रूपबन्धनकार्यसामर्थ्यवत्त्वा
दिवत्यलाभेऽपि तादृशबंधनसामर्थ्यवत्वेन खादिरबोधात् तादृशसामर्थ्यस्यापि परित्यागे मानाभावात् तादृशसाम
र्थ्यवत्वेनान्यपरिग्रहेऽपि न शास्त्रार्थहानिरिति॰ तथा च शाब्दबोधे आकांक्षज्ञानमेव कारणं नैयायिकादिसि
द्धयोग्यताज्ञानमिति॰ एवमासत्तिज्ञानतात्पर्यज्ञानयोरपि कारणत्वमग्रे निराकरिष्यते॰ इति वचनं ऽइत्साका

© Dharmartha Trust J&K. Digitized by eGangotri

न कप्राचीनवैयाकरणसूत्रं। एवं सत्यपि· श्रुत्यनुसारित्वे सत्यपि· तत्रापि· फलसपि· फलतामयीति· एवमन्यपक्ष

मितिविवरणं सम्यगेवेति भावः। फलांशो विवरणे प्रतीतेश्चेत्यपि पाठान्तरं तत्र फलम्: मितिय च् धातुना विवरणे

त्यर्थः। उभयसाधारण्येन तदिति· तिङ् इत्युभयसाधारण्येन भावनेत्यर्थः। धातुनैवेति। फलप्रकारकानुकूल

त्वसंसर्गाप्रापन्न विशेष्यकशाब्दबोधे त्वप्राधान्याख्यानयोर्धातु फलतोश्चानुपूर्व्याहितुताश्चीकार्यामियातु धा

तोरेवेति लाघवमिति भावः। प्राधान्यापत्तिश्चेति· कृतिभावनयोरपि नाधांसंस्यादित्यर्थः। न चेष्टापत्तिरयसि

द्धान्तात्· साधकान्तरमिति· फलान्वयस्थले भावनाप्रतीतिरेव तस्याधातुवाच्यत्वे मानं। तथाहि सति फलस्तु भावना

प्रतीतिः कर्मण्यनीयरप्रत्ययाद्युत्पत्तिश्च सिद्धान्तवस्तुतस्यात्राख्यातार्थत्वे फलस्तु वाचकाभावेन भावनाप्रत्य

याप्रसंगः कर्मण्यनीयरप्रत्ययाद्यप्रसङ्गश्च स्यादिति भावः। एतासन्त इति· कर्तृकर्मादिः क्रियानिरूपितत्वादि

© Dharmartha Trust J&K. Digitized by eGangotri

ल·भू·टी· त्तिभावस्तत्राह०विनेति·भाद्दशीतिमिति कर्त्रादिनाभावनाऽऽक्षिप्यतेइति हिनेषांरीति:तथात्वापत्तौभावनाया
30 आक्षेपापत्तौ·कर्तुर्वाच्यमिति·कृतीतिशेष:समासोनस्यादिति·भावनायाधात्ववाच्यत्वेनरवादे:फलस्वफलसर्थो
त्क्रियान्निरूपितकर्तृवाचकत्वाभावादितिभाव: साक्षादिति· कृधातोर्व्यापारार्थकत्वात्·परंपरासंबन्धेति·स्व
कर्तृकभावनाजन्यत्वादिरूपेत्यर्थ:एकस्यामिति·तथाचाक्षिप्तभावनायांनस्वभिन्नपदार्थयोरन्वयादस्तिसा
मर्थ्यमितिभाव:असमर्थसमासत्वानापत्तेरभावसूर्ययो:प्रतियोगित्वकर्मत्वाभ्यांदृशिक्रियामन्वयाद
स्तिसामर्थ्यमितिभाव: (असमर्थसमासत्वानापत्तेरिति·अभावसूर्ययो:प्रतियोगित्वकर्मत्वाभ्यांदृशिक्रिया
मन्वयादस्तित्वदुक्तरीत्यासामर्थ्यमितिभाव: एतत:सर्वइति·सकर्मकत्वकरणत्वासर्वमन्त्रिकयाकृधात्वया
त्क्रियायामन्वयादितिभाव: किञ्चभावनायाइति·उपपादितमिदमधस्तात्·विष्णुमित्रेणेति·नेयंक

© Dharmartha Trust J&K. Digitized by eGangotri

नत्वेतत्तृतीया हेतुमति चेति णिचोऽत्रासंभवापत्तेः तत्प्रयोजको हेतुश्चेति कर्तृप्रयोजकस्यैव हेतुसञ्ज्ञाविधानात्.
गतिबुद्धीति नियमाच्च न प्रयोजयकर्तुर्विष्णुमित्रस्य कर्मत्वं गतिकर्मत्वानायत्तत्वेश्चेति. कर्तुरीप्सिततमे— शास्त्र
वल्लभ्यकर्तृनिष्ठक्रियायाः संबन्धुमिष्यमाणस्यैव कर्मसञ्ज्ञाविधानात्. गत्यर्थकर्मण्येव। गत्यर्थक्रियाजन्यफ
लाश्रये गत्यर्थक्रियानिरूपितकर्मण्येव. एतेन पाचयति देवदत्तो विष्णुमित्रेणेत्यत्र तृतीयोपपत्तावप्युक्तस्य
लेद्वितीयाचतुर्थ्योरप्राप्तिरूपदूषणेनावकाशः यस्मिन्प्रयोगे इति यस्मिन्प्रयोगे आख्यातार्थव्यापाराश्रयस्य कर्तृ
त्वमिष्यते तस्यावश्यकत्वेनेत्यर्थः अन्यथा क्वचित्प्रयोगे काष्ठादेः कर्तृत्वं क्वचित्तु नेति व्यवस्थानभेदः अपि तु सर्वत्रैव
सर्वस्य कर्तृत्वापत्तिरिति भावः इति दिगिति. कामं केति सूत्रस्य भाष्यादपि भावनाया धातुवाच्यत्वलाभः तत्राहि
अधिश्रयणोदकासेचनैधोपकर्षणक्रियाः कुर्वन्देवदत्तो पचतीत्युच्यते तदा तत्राधिश्रयणादिषु पचिव

© Dharmartha Trust J&K. Digitized by eGangotri

ध॰भू॰टी॰ ल्लति॰ न्वेलं न क्रियां कुर्वन्तीत्युच्यते तदा तत्र यचि वर्तते यद्ग्रहणं रूपं संभवनं न्यासमात्रे रूपं धानणं कुर्वन्तीत्यादौ

31 यदा तदत्रपचि वर्जते इत्युक्तमिति॰ उक्तार्थस्य धातोर्थोपानवाचकः तत्त्वशादृश्यं चापर्यवसितामिति॰ तथा च

त्वदुक्तरीत्या धातोः क्रियावाचकत्वानंगीकारेऽनुमतः धातुत्वाभावाद्धातोरित्यधिकृत्य विहितानि कार्याणि न स्यु

रिति भावः तावन्मात्रोक्ताविति॰ भ्वादिगणपठितत्वमात्रोक्तावित्यर्थः न च वा शब्दोऽप्यर्थः भ्वादय इत्येतावतैव सि

द्धेरिति वाच्यम्॰ भूवादीनामेवकारो मंगलार्थः प्रयुज्यत इति वार्त्तिकात् तत्रत्यस्य वाशब्दस्य मंगलार्थत्वेनोपपत्तेः

गणपठितत्वत्वेति॰ एतदस्वरसात् मंगलार्थत्वपक्षं परित्यज्य भुवो वार्थं वदन्तो भ्वर्था वादय इत्याहुरिति पक्ष

यं लघुभूतं वार्त्तिके उक्तान्तस्यार्थः भुवः भूधातोरर्थं वदन्तीति भूवादय इतीदं तावत् यथार्थकथनं शब्दार्थ

स्तु भवनं भूः क्रियासामान्यं संपदादित्वात् क्विप् भवं वदन्तीति वदेरौणादिक इञ्प्रत्ययः क्रियासामान्यवाचि

© Dharmartha Trust J&K. Digitized by eGangotri

नइति· यावत्क्रियाविशेषवाचिनां तु शेषेषु सामान्यस्यानुस्यूतत्वाद्धातुत्वम्· ननु इह कुतः पृथक् इत्याशङ्क्यावतिष्ठते
रत आह· वर्यचिति· वर्था: क्रियार्था वादयो भूवादय इति स्मृता इति द्रमपिताप्यर्थे कथनमेव· शब्दार्थस्तु भव
नं भूः क्रियासामान्यं वा धातोरादयो वादयः वा धातुरादिर्येषां ते वादयः· वादयश्च वादयश्चेति तत्पुरुषबहुव्रीह्यो
:स्वरूपनिमित्तेकशेषबहुव्रीहिणा वादिपदेन भुवो वादय इति समासः भवइति वाच्यवाचकभावं संबन्धेषष्ठी
क्रियार्था भ्वादयो धातवइत्येतत्सिद्धमिति· निर्णयासंभवादिति· धातुनेवगणेपठितो नाव्ययमिति निर्णयाशंभ
वादिसर्यः प्रयोगः स्यादिति· वस्तुतो भ्रमादिपदिकत्वेन मुवनापत्तिरित्यन्यत्र स्पष्टं। पृथाभुतेः संख्याकामका
देरभावेनतिसुसस्योरयोगात्· नियामक इति· गतिगन्धनार्थएव· वाधातुसञ्ज्ञो नत्विकस्यार्थइतिभावः।
नन्वस्त्विति। सौत्राणां स्तंभ्वादीनां लोकमात्रप्रसिद्धानां चुलुम्पादीनां धातुत्वं भ्वादिसूत्रलक्षणेन बहुत्वमेत

ल·भू·टी· न्निदर्शनमित्यनेन च बोध्यम्· यथा श्रुतेरिसस्यासंगत्यायत्तावन्वयः उत्पत्तौ गृहे चेति· अन्योन्याश्रयस्य दूषक
32 तातर्कविधेया बोध्या तथाहि घटो यदि घटअन्यः स्यात्तर्हि घटादिभिन्नः स्यादिति· एवं प्रत्यपि बोध्यम्· स्थिता
वन्योन्याश्रयानुत्थितिः तु प्रयोजनाभावात्· न चान्यतमत्वमिति: धातुसंज्ञकत्वेनाभिप्रेतान्सर्वान्· तत्र घक्तित्वे
नोपादायतत्त्वभेदकूपवच्छिन्नप्रतियोगिताकभेदवत्त्वरूपमेव तदित्यर्थः फलांशानिति· गणपठितत्वे सति
सतादिक्रियार्थकत्वमिति तु नाशं। कितं अर्थान्तरे तेषामेव धातुत्वानापत्तेरिति फलानामेवान्यतमत्वेनोपादा
नं। क्रियाशब्देनेति· कर्मवत्कर्मणा तुल्यक्रियः: क्रियायाः पनिनिष्पत्तिरित्याद्यौ क्रियापदेन फलस्यैव ग्रहणात्
विकल्पयतीति· धृपूसामर्थ्ये· विस्पर्द्धः नन्वस्यैवेति· गणपठितत्वे सति क्रियावाचकत्वं स्यैवेत्यर्थः तद्वाचका
नां क्रियावाचकभिन्नानां। असभुवीत्यादाविति· अयंभावः भूधातोः स्थितुत्यसुभयार्थकत्वे धात्वानाभवने

© Dharmartha Trust J&K. Digitized by eGangotri

तत्र जातस्तत्र भवइत्यादि सौत्रनिर्देशाल्लिंगोरवच्च स्थित्यर्थकधातुमोडो उत्तसर्थकधातुयोगेच भावनाप्रतीत्यु
पपादनेनतत्समानार्थकभूधातुयोगेप्यितदुपपादनं भवति· तथा चोत्तस्यानुकूलव्यापार:स्थितनुकूलव्यापार: स
त्वाद्दनुकूलव्यापार: श्मास्मादीनर्थस्तत्र व्यापारश्चान्ततत्राह· आश्रयते वसाध्यत्वेनाभिधीयमाना: पाल
ज्ञानन्नये सर्वपदार्थानामवस्यादिरूपेण प्रतिक्षणपरिणामितयातत्तत्परिणामावच्छिन्नसत्तिनिरूपितानामाश्र
यतानामनेकतया पूर्वापरीभूतावयवकत्वाश्रुते। सताप्यमिवकालगतपौर्वापर्य्यानोपेलवेति सिद्धं तस्या: क्रियात्वं
तत्रासन्नविनाशकं किंचिदुद्दिश्य किंकरोतीति प्रश्ने ऽस्तीति समुत्तरात्संज्ञानदनुकूलव्यापारो वा प्रतीयते ऽस्तुपा
दितमधस्तात् गतानवेतिप्रश्नोत्तरेऽस्तीत्यादौ स्थित्यनुकूलो व्यापार: प्रतीयते रोहितो लोहितादित्यादौ तु उत्तस्यानु
कूलव्यापारइति महतापल्लेनेति· इदं तिष्ठतीत्यादावपि तस्यानुकूलभावनाया: प्रत्ययत्वेन स्पष्टप्रतिपत्त्ये उक्तं

© Dharmartha Trust J&K. Digitized by eGangotri

ल·भू·टी· तस्या एवेति· भावना एवेत्यर्थः· अन्यत्रेतीति· व्यापाराधिकरणाभिन्नस्य फलनिरूपितविशेषणत्वाभावात्· व्यापारा
33 श्रयस्यैव फलविशेषणत्वादिति यावत्· शेषपदस्य विशेषणपरत्वात्तदाह· फलसमानाधिकरणत्वादिति·
ननु घटोस्तीत्यादौ घटस्य साध्यमानत्वप्रतीतेरसिद्धस्य घटस्य न कर्तृत्वसंभवो निष्पन्ने च तस्मिन्न साध्यमान
त्वसंभव इति चेन्न· बौद्धसिद्धघटस्य बाह्यसाध्यघटेनाभेदमादायोभयसंभवादिति· अस्तीत्युत्तरस्य· सत्तार्थक
स्य· तदनुकूलव्यापारार्थकस्य वा· फलव्यापारयोरिति· कारिकायां धातोरिति पूर्वान्वयि· मितियावदिति· अ
त्रेदं तत्त्वं· व्यापारव्यधिकरणफलवाचकत्वाभावरूपाकर्मकत्व एव मूलतात्पर्यम्· स चाभावः क्वचिद्वैयधि
करण्याभावात् वैयधिकरण्ये च तद्व्यधिकरणावृत्तित्वतदनधिकरणावृत्तित्वोभयरूपं तत्राद्यस्याभावादुत्ति
पतीत्यादावकर्मकत्वं मूलोक्तभिन्नाधिकरणावृत्तित्वस्वरूपाकर्मकत्वपरिग्रहे च ऊर्द्धदेशसंयोगरूपफल

© Dharmartha Trust J&K. Digitized by eGangotri

स्योऽदिहेतोपि सत्वे नाकर्मकत्वाभावेन मूलोक्तसकर्मकत्वलक्षणाक्रान्तत्वेन कर्मप्रत्ययोत्पत्तौ तत्र चासिद्धान्तत्वे
फलस्यैव प्राधान्येन तत्रैव भूतकालान्वयेन साफल्यस्य चोद्देशसंयोगस्य विद्यमानत्वेऽपि तद्गमिप्रयोगाना
पत्तिः मम तु उक्तफलस्य व्यापाराधिकरणवृत्तित्वाभावेन विशेषणभावप्रयुक्तो विशिष्टाभाव इति अकर्मक
त्वधीमे व्यापाराश्रये कर्तरि एव तत्प्रत्ययप्रवृत्तिः तदनुकूलव्यापारस्यातीतत्वात्तस्याविद्यमानत्वेपि तदुपपत्तिः
गमधातोः फलस्य व्यापाराधिकरणवृत्तित्वाभावेपि तदनधिकरणवृत्तित्वरूपवैयधिकरण्यसत्वान्नाविशि
ष्टाव्याप्तिः क्वचित्तदंशाभावाद्यथा अस्मीवस्ते ॥ यद्वा केवलसत्तार्थकत्वमतेऽस्तीत्यपि विधेयं· अन्तर्भाविताद्इति· आ
त्मरूपकर्मणा धात्वर्थेन्तर्भूतत्वादित्यर्थः ननु आत्मास्ति दिगस्तीत्यादौ निरुक्तोत्पत्तिस्थित्यनुकूलव्यापारार्थ
संभवादाह ।स्वधारणेति शलोप्रधानो धानणार्थकत्वादेतदर्थलाभः स्वाधानणं ।स्व स्वरूपधानणं उत्तरक्षणसंब

© Dharmartha Trust J&K. Digitized by eGangotri

वै.भू.टी. ध्यनुरूपं फलं। व्यापारश्चापच्यते तं दुह्यन्तः स्वयमेवेत्याद्या विवोक्करीत्याश्रयत्वे वसाध्यत्वेनाभिधीयमाना॥ तथा चात्मा

34 दिः स्वस्वरूपधानलंकनोतीत्यर्थः सामानाधिकरण्यसत्वादिति। तेन प्रकृतोपपद्यं प्र-संगतिः॥ न चात्मा आत्मा

नं जानातीत्यात्रावेकस्यैवात्मनः फलव्यापारोभयाधिकरणत्वान्न फलसमानाधिकरणव्यापारवाचकत्वेनाक

र्मकत्वापत्तिरत आह। आत्मानमिति। वस्तुतस्तु द्वितीयकर्मसंज्ञकार्थान्वय्यर्थकत्वं सकर्मकत्वम्। सकर्मकप

दत्पुत्पत्त्यानर्थैवत्वाभावात्। तद्भिन्नं सकर्मकत्वं अत एवाधिशीङ् कर्मेत्याधानस्य कर्मसंज्ञाविषये अध्यासिता

भूमयहस्त्याद्रौ न सिसिद्धिः॥ किंतु नसकर्मकत्वसत्वात्। मूले न्हरीत्याः कर्मकत्वं न स्यादेनु नुस्स्यात्। न च प्राणधा

रणाननुकूलव्यापारार्थकेषु जीवत्यादिषु दोषः धातोः प्राणादिरूपकर्मार्थान्वय्यर्थकत्वादिति वाच्यं। धातोः

पृथगुक्तसंसर्गान्वयेनैव वारणात्। अत्र तु प्राणादिरूपकर्मणो धातुतएव बोधात्। एतद्दोषवारणाय मूले

© Dharmartha Trust J&K. Digitized by eGangotri

मत्वस्यलेर्विशेषणमस्येत्यादिकंगौरवग्रस्तमितिनिरूपितमधस्तात्·नः कर्मणीत्याद्यौसर्वत्राकर्मकपदस्यकर्मीय
देनकालभावाध्वदेशभिन्नानामेवग्रहणंगतिबुद्धीतिसूत्रेसजातीयापेक्षसकर्मकविषयेननियमेनसिद्धः
कर्मग्रहणंसामर्थ्यादितिगतिबुद्धीतिसूत्रेभाष्यस्यघृम् तेनमासमास्यतेइत्यादौभावेल्यादिसिद्धिः सक
र्मपदस्यकर्मपदेननुसर्वकर्मककर्मदास्यतेभासद्भ्यपि·अतएवकालाध्वनोरित्यनेनद्वितीयायांसिद्धायामत्रकर्म
णीत्यादिविधानार्थंकालोभावोगंतव्योध्वेतिवार्त्तिकेनकर्मसंज्ञाविधानंसंगच्छते·संगच्छते चासनकरण
वत्थायनेआसधातोर्वृत्तिश्वीकृत्यकर्तुरितिकर्मत्वंसंसाध्यवार्त्तिकप्रत्याख्यानमितिदिक् ॥ अदभिहितइति
अदन्ताभिहितइत्यर्थमनसिकृत्वायंविरोधोभिहितः भाष्यविरोधादिति इमवक्ष्यदेनासत्वभूतत्वनिराकर
णात्।भाष्यविरोधइतिभावः।भागद्यसत्वादिति·तथाचनत्रापिप्रत्ययशक्तिमाश्रयशिष्टवस्यायन्नाक्रिया

© Dharmartha Trust J&K. Digitized by eGangotri

ल.भू.टी. प्रतीत्यापत्तिरितिभावः वस्तुतः प्रत्ययेन कर्त्राद्यभिधानात्साधनवत्त्विनेतिपर्यथाश्रुतेऽपि न दोष इति बोध्यं। पचयत्र मंप्र
35 त्ति पश्यतस्य साध्यरूपता धावतीत्यत्र साधनरूपमस्य यतेरित्यर्थः न्वयित्वमिति धावतीति धावनक्रियायाः क
र्मत्वेनान्वयात्साधनमित्यर्थः। प्रकृत्या धातुभागेन। पच्यतेति। क्रियेति विशेषः पचतीति पचतीत्यर्थः पाक
इत्याद्याविस्यर्थः आख्यातान्तेति। तथाभिधाने। साध्यत्वेनाभिधाने। कर्मषष्ठ्या एवेति। साध्यावस्थापन्नक्रिया
पन्नक्रियायोगं विना कर्मत्वासंभवात्तदवस्थापन्नक्रियानिरूपितस्यैव कारकत्वादितिभावः क्रियान्वया
दिति ल्यपन्तोऽयं। अन्वेमी। क्रियान्वयमादायेत्यर्थः कृदन्तेन योग एवेति। प्रत्यासत्त्या कृत्प्रत्यय इत्यर्थः क्रिया
निरूपितकर्मत्वेनषष्ठीविधानादित्यर्थः तत्रैवेति। प्रत्यासत्त्यनंगीकाने कर्तृकर्मणोरित्यस्य वैयर्थ्यापत्ते
श्चेत्यपि बोध्यम् अत्रासामर्थ्यादोदनपाक इत्यादौ समासाभावप्राप्तिरपि बोध्यं। न च शेषषष्ठ्या समासः सत्त्व

© Dharmartha Trust J&K. Digitized by eGangotri

पाके-ओदनपाक इत्यादौ कर्तृत्वकर्मत्वप्रकारकबोधानापत्तेः कर्तृकर्मणोरित्यस्य वैयर्थ्यापत्तेश्चेति ननु भावकृ
ति पाक इत्यादौ धातोः साध्यावस्थापन्नक्रियावाचकत्वे ओदनस्य पाक इतिवत् काष्ठैः पाक इत्यस्यापि मीमांसका
नभिमतस्यापत्तिस्तत्रेष्टापत्तिमाह। एवं रीत्येति। स्तोकं पाक इत्याद्युपपद्यते इति। स्तोकं पचनीयादौ फलस्यापि व्या
पि देशविभावे फलनिष्ठया यत्नया कर्मत्वाद् भेदेन तद्विशेषणे स्तोकादौ द्वितीयेव स्तोकं पाक इत्यादावपीत्यर्थः क्रिया
विशेषणानां कर्मत्वमित्यस्य सार्वत्रिकत्वापादितार्थिकमनेनुत्रा विशेषात् ज्योतिष्टोमेन यजेतेत्यादावपि ज्योति
ष्टोमपदोत्तरं द्वितीयापत्तिरित्यपि बोध्यम्। न च स्तोकं पाक इत्यादौ कर्तृकर्मणोरिति षष्ठ्याभावं स्तोकस्य कृत्यर्थक
सर्वक्रियानिरूपितकर्मत्वादिति शङ्क्यम्। कर्तृसाहचर्येण धात्वर्थभेदेनान्वयिन एव कर्मणो ग्रहणात्। मूले साध्य
त्वेन क्रियेति। अत एव भोक्तुं पाक इत्यादौ क्रियार्थक्रियायोपपदे विधीयमानतुमुनादिसिद्धिः क्रियापदस्य साध्यत्व

© Dharmartha Trust J&K. Digitized by eGangotri

ल.भू.टी. 38 विशिष्टत्वापानेनैव प्रवृत्तेः न च पदार्थः पदार्थेनेति न्यायेनैकदेशभूतधात्वर्थक्रियाया उपपदत्वमादाय कथं तुमु
न्निति । भोक्तुं गतो देवदत्त इत्यत्र गतौ ग्रामः कृतपूर्वी कटमित्यादौ कारणं गुणभूतक्रियायामन्वयदर्शनेनोक्त
न्यायस्य क्रियान्तरविषयत्वमित्याशयात् । वस्तुतो भोक्तुं पाकः भोक्तुं गत इत्यादयः साधव एव । क्रियार्थायां
क्रियायामित्युक्तप्रत्यासत्त्या क्रिययोरेकजातीयत्वे लाभेन स्वप्रकृतिकप्रत्ययार्थं प्रति गुणीभूतायाः साध्या
वस्थापन्नमात्रायाः एव क्रियार्थक्रियाया ग्रहणात् । नन्वेवमुक्तरीत्या पचत्वकृत्वः पाक इत्यादौ कृत्वसुजपि
न स्यात् तद्धि धात्वर्थे तादृशक्रियाया ग्रहणसंभवादिति चेन्न । यत्र विधौ क्रियावाचकशब्दग्रहणं तत्रैव क्रि
याया एव ग्रहणम् । यत्र तु क्रियानिरूपितार्थग्रहणं तत्र गुणीभूतादेरपि देरपि ग्रहमित्यदोषात् । तुमुन्विधौ चोपप
पदत्वेन शब्दग्रहणमिति न तत्रेति बोध्यम् । न चैवं पाक इत्यादौ दिवाकन क्रियावोधापत्तिः एकस्यैव पदार्थ

© Dharmartha Trust J&K. Digitized by eGangotri

स्यसाध्यत्वसिद्धत्वाभ्यामुपस्थितिरित्यत्रतात्पर्य्यात्. नचाभ्यांविनुद्धाभ्यामकथमेकपदार्थोपस्थितिरितिवाच्य
म् ॥ यथानित्यसम्बन्धिभेदादेकस्यैववाचार्य्यत्वमातुलत्वाभ्यामुपस्थितिस्तथाकानकलिंगादिसंबन्धिभेदे
नचतयोरेकाधिकरणवृत्तित्वेनोपस्थितौविरोधाभावस्वीकारान्. मानत्वादिति. सर्वलिंगसंख्यायोगद
र्शनाच्चैतस्यापिबोध्यम्. एकस्यैवधात्वर्थस्यसाध्यत्वेनप्रकाननमासिद्धत्वेनविशेष्यता । एतन्निष्ठत्वमेवतयोर्भेदि
नयहेप्रतिबन्धकं । तथाचयत्नाख्योभावःप्रधानमितिसिद्धं । अतएवकर्त्तरिकृदितिसूत्रेभाष्येयत्नाख्योभावो
वाच्यःप्रकृत्यर्थादित्युक्तम् । स्तोकःपाकइति. ध्वमर्थव्यापारविशेषणत्वात्प्रथमानद्वितीयातस्याकर्मत्वाभा
वेनतद्विशेषणस्यापितत्त्वाभावात्. नचधात्वर्थभावनान्वयेनतत्सिद्धिः ज्योतिष्टोमेनभक्तिपूर्वयिमेतिवत्क
र्थंचित्प्रथमासम्भवेपिसामान्येनपुंसकमितिनपुंसकतायाःअसत्वभूतत्वेनदुर्वारत्वादितिकेचित् । द्वितीयेति । न

© Dharmartha Trust J&K. Digitized by eGangotri

स·भू·टी०
37

पुंसकत्वं चेति शेषः। यजादीनां प्रयोगसाधुमात्रमेवास्त्वित्याशयेनाशंकते· न चेति· स्याप्यान्वयेति· सन्नभीनसुनु
षः। इति द्विर्मिति। इदमत्रतत्वं। स्तोकादीनां धात्वर्थफलविशेषणत्वे तेभ्यो द्वितीयान पुंसकत्वञ्च। धात्वर्थव्यापार
विशेषणत्वे प्रथमान पुंसकत्वञ्च प्रत्ययार्थभावविशेषणत्वे प्रथमा पुंस्त्वं चेति· तुमुनादिविषये धातुना साध्याव
स्थापन्नभाव एवाभिधीयते तुमुनादिप्रत्ययेनापि तादृश एवेति तेषां धात्वार्थानुवादकतामात्रमिति पाकादि
भ्यो विशेष इति तत्कार्थनिर्णये वक्ष्यामः। नियमे वनियमे सत्वे वा तदेवेति· सामान्येन पुंसकं कारकाणां भावनान्वयि
नियमइत्यर्थः। सएवेति पाठस्तु सुगमः एवा समान एवा भेद एवेति। एकवाक्यता एवेत्यर्थः आख्यातं स विशेषणं वा
क्यमिति वार्त्तिक स्फुटं लौकिकं वाक्यलक्षणम्। अत्राख्यातशब्देन क्रियाबोधकं। इदमेवा—नेणाप्युक्तं। सुप्ति
ङन्तचयो वाक्यं क्रिया वा कारकान्वितेति। अत्र वा शब्दश्चेदर्थे वाक्यमिति शेषः कारकान्विता क्रिया वा धा

© Dharmartha Trust J&K. Digitized by eGangotri

चेदित्यर्थः तथाच कानकाङ्क्षितक्रियाबोधकसुप्तिङ्-चय इति फलितं सुप् च तिङ् च सुप्तिङ्-तयोर्नैरेकशेषेऽन्त
शब्देन समासस्तेन सुबन्तचपतिङन्त चयः सुप्तिङन्त चयालाभं चयालाभं लक्षणं स्याभस्तत्र प्रथमस्य चैत्रेण शायित
ध्यामिसुदाहरणं। द्वितीयस्य पचति भवतीति। तृतीयस्य चैत्रः पचतीति। क्रियाबोधिविशेषणेन निरर्थकपदसमु
च्चारस्य। सुप्तिङन्तचयपदेन केवलस्य पचतीत्यादेरप्यपि कर्त्रादिविशिष्टबोधकत्वात्। एतदेवैकोद्देश्यक
त्वएकविधेयत्वगर्भमेकवाक्यमित्युच्यते। तदेवोक्तं हरिणा। साकांक्षावयवं भेदे परानाकांक्षशब्दकं क्रियाप्र
धानं गुणवदेकार्थं वाक्यमुच्यते इत्यत्र वाक्यमित्यस्यैकं वाक्यमित्यर्थः अर्थैकत्वादेकं वाक्यं साकांक्षं चेद्विभागे स्या
दिति जैमिनिसूत्रानुरोधात्। यत्त्वमनेकक्रियावेति लक्षणान्तं तन्न समर्थनिरूपवाक्यत्वबोधकमिति। तन्न। वचोऽश
ब्दसंज्ञायामिति कुत्वनिषेधेनार्थे वाक्यशब्दाप्रयोगात्। कुमारीत्यादिविधस्यापि लक्षणस्याव्याप्तिप्रसक्ताच्च।

© Dharmartha Trust J&K. Digitized by eGangotri

सं·भू·टी·

38.

तथा चास्य संबोधनस्य क्रियाविशेषणत्वाभावे वाक्यमेव न स्यात् । तन्त्रैकवाक्यत्वाय परपदार्थसमानवाक्यत्वमिति सम
मानवाक्ये इति प्रकृतसूत्रे विहितः पराङ्गवत्स्वामन्त्रितस्येति नियमो न स्यादतः संबोधनविभक्तेरनुवाद्यविषयतया
ऽनुवाद्यस्य च विधेये स्वान्वयेन विधेयत्वापाताच्च क्रियाविशेषणत्वेन तस्यामेवान्वयो वाच्य इति प्रकृतमित्यस्य स्फुटीक
रिष्यते · तत्क्रियाया विशेषणमिति संबोध्यमानदेवदत्तविषयकजननक्रियायाः संबोध्यमानदेवदत्तेनान्यक्रिया
तो व्यावर्तनात् · व्यावर्तकत्वरूपं विशेषणत्वमित्यर्थः । देवदत्त जानीतीति नु नोदाहृतं । पराङ्गवत्त्वाभावात् · आख्या
तं सविशेषणमिति लोके वाक्यलक्षणस्यावश्यकत्वमाह · पचतीति · स्व [illegible] री लिङ्गमेवाह · तिङ्ङ्गभीति · अन्यथा
तिङ्· तिङन्तद्वयेऽएकवाक्यत्वाभावेन तिप्रसंगे अतिङिति निषेधवैयर्थ्यापत्तिः स्यादिति भावः । भाष्यरूपतानुपच
ति भवतीत्यादेः । भाको भवतीत्याद्यर्थकत्वेन रूपवाक्यत्वं स्पष्टमेवोक्तं · ननु भक्षरीत्या पचति भवतीत्यादावेकवाक्यत्वा

© Dharmartha Trust J&K. Digitized by eGangotri

ङी काने प्राप्त निघातवारणार्थमतिङ् ग्रहणं स्यावश्यकत्वात्तस्याख्यानासङ्गतिरिति चेन्न· लौकिकैकवाक्य
तासत्वेपि एकतिङ् वाक्यमिति परिभाषितस्यासत्वेन लक्ष्यार्थमित्या ~ शयात्· ननु ग्रहणमा । एकतिङ् यस्य वा
क्यं नु शास्त्रनियतानेक्षणं तस्यातिङ् ग्रहणेनार्थो वाक्यभेदान विघते वक्ष्यपितिङ् न्ते युष्माकांस्मेष्वेकवाक्यता ॥
तिङ तिङो निघातस्य प्रतिषेधस्तत्पार्थवानिति· अत एवोच्यते । तथा तिङन्तमप्याकृष्टं तिङन्तस्य विशेषणमिति च
वर्ण्णितकमतेपीष्टमाह· वस्तुत इति· एकतिङ् विशेष्यकं । एकतिङन्तार्थविशेष्यकम् । एवं पूर्वे स्मातितरो व्रजनीय
व्रततरस्य स्यात्परस्य व्रजनीयस्य तिङ् इनितै ङ् धातः सिद्धः । पुनः पुनर्जन्मा । पुनरुत्पत्तिः । तस्मिन्योस्येति । पंचत्वसं
ख्योत्पत्तिमदर्थगणनधर्मा नात्संख्यावाचकात् कृत्वसुजित्यर्थात्· प्रत्ययस्तु द्योतक एव उत्पत्तिमदर्थस्तु
क्रियायैव । तथा च पंचकृत्वो भुंक्ते इत्यादौ पंचशब्दः पंचत्वसंख्योत्पत्तिमदर्थपरः तस्य च क्रियया अन्वयः एतच्छु

© Dharmartha Trust J&K. Digitized by eGangotri

स्त्रात्वोधश्चपश्चत्वश्चोत्पत्तिकाभुञ्जिक्रियेति· कर्तृवकृत्वेनुपश्चधृत्वोभुञ्जतेइतिवकृवचनमपिद्विरावृद्दशे
सादावप्यावृत्तिक्रियाजन्मगणेनेएवसुचूपवचनश्रूयते यानत्राप्तिक्रियाध्याहारोबोधः। क्रियान्वयिनामेवेति·
अनेनक्रियान्वयित्वं।कारकत्वमित्युक्तंभवति·वस्तुतः क्रियाजनकत्वं करोतिकर्तृकर्मादिव्यपदेशान्नेत्युत्सर्थकोऽति
नामुत्पादस्यादितिसुवर्थनिर्णयेवक्ष्यामः।इत्युक्तत्वादिति· अयंभावः।उपमेयस्यक्रियात्वेऽपमानवानकात्तृतीयाता
तुल्यमित्यर्थेवतिरितिप्रथमसूत्रार्थः नचब्राह्मणवदधीतेइत्यादौनप्राप्नोतिब्राह्मणनिरूपितशब्दस्यपस्या
ध्ययनेऽभावादितिवाच्यम्· ब्राह्मणादिपदानांतत्कर्तृकाध्ययनेलाक्षणिकत्वात्· सोऽप्यादिश्चसाधानत्वोधर्म
:ततश्चब्राह्मणकर्तृकाध्ययनंसदृशंक्षत्रियकर्तृकमितिब्राह्मणवदधीतेक्षत्रियइत्यादौबोधः एवंचास्यक्रिया
न्वयएवसाधुत्वमितिस्पष्टमेवेति· अनविन्दवत्सुन्दनंमुखमित्यादौवत्सुपपन्नयेभवतिक्रियाध्याहारः अनविन्द

© Dharmartha Trust J&K. Digitized by eGangotri

पदेनचारविन्दभवनंलक्ष्यते।सौन्दर्यंचसाधारणोधर्मस्तुपादत्वएव।एवंचसुन्दरारविन्दभवनसदृशंसुन्दरमुख
भवनमितिबोधः।अरविन्दमुखयोःसौन्दर्यधर्मकसादृश्यंत्वनंतनंक्सज्ञानयावुध्यते·अतएवब्राह्मणेननुस्मृ
पमित्याक्षेपनिर्नेत्रिपान्वयाभावात्·अनेनैवसिद्धेतत्रतस्यैवेतिमुद्रस्यगुणादिनुस्वार्थम्·तदर्हमितिनुअर्हार्थ
मित्यमत्रविस्तरः·विधानार्थमिति·वसन्तदर्शेसाद्यावितिभावः·उक्तनयप्रयार्थान्वयेपीति·पर्युदासार्थकनञ्इतिशेष
ः।विवेचापि— तेचेदंनअर्थनिर्णये।निषधमतीतेदिति·अन्यथामध्यमपुरुषायनापत्तेरितिभावः·तथाप्रयो
गः·घटोनजायतेइतिप्रयोगः·तत्कारणजननाभावसत्वादितिभावः·क्रियायेवाप्राधान्यतामिति·मूलेएवशब्दो
योगव्यवच्छेदार्थस्तथाहि·उत्तरीत्याक्रियान्वयेएवाख्यातस्यसाधुत्वंभावकर्मवान्वयइतिनुक्तोनियमः·क्रियायाः
पनीयादेःफलायकर्तृत्वेपिनोप्रसिद्धस्यक्रियाशब्दस्यक्रियाभ्येस्याहेग्रहणसंभवादतआह·अप्रयभावइति·योगि

© Dharmartha Trust J&K. Digitized by eGangotri

स्व.भू.टी. क इति। क्रियते साऽक्रियेतीत्यर्थः। सञ्ज्ञाशब्दस्यभावार्थकक्रियेति सञ्ज्ञाशब्दस्य। अनपेक्षेति। योगानपेक्षेत्यर्थ
40 ः। रथन्तरमुक्तमिति। ज्योतिष्टोमे न श्रूयते रथन्तरमुक्तं योगायतीति। क्रियाविशेषफलागानविशेषो रथन्तरसामादृ
तत्राभित्वा शूर नोनुम इति ऋच्युत्पन्नं साम्नो योनिस्तदुक्तं च यद्वेदपठ्यमानत्वाभिर्दिह वामहे इत्यादिकाऽऋग
स्ति तत्र रथन्तरमुक्तं योगायतीति वचनप्रतिपाद्यं रथन्तरं सामान्यमनयोः। अस्मिन् वचने उक्ता शब्दस्य सञ्ज्ञादशब्द
तयोक्तरा सञ्ज्ञकयस्य — समानकश्चैव गेयं उत्तरासंज्ञकं ग्रंथे हि सर्वेषां साम्नापि शिष्ययोनि। भक्ता कं चोवि
शिष्यसंतीति सिद्धान्तः। यश्चित् पाकं करोतीत्याद्येतथाभूतानि। गुणानामिति। परार्थत्वं गुणहेतुः समत्वसंम्बन्धहे
तुः एवं च परार्थत्वात् गुणानां परस्परमसम्बन्धः समत्वादित्यर्थः। क्रमकार्येति। विशेष्यतया धात्वर्थप्रकारक
बोधं प्रति क्रमजन्योपस्थितिः कारणमिति क्रमकार्यमित्यर्थः। अदर्शनात्। अपि तु अक्तिकरोऽपराकांक्षापदवदर्शनात्।

© Dharmartha Trust J&K. Digitized by eGangotri

तत्र च तेनैकेन क्रियाव्यतिरेकेण · आहरेत्यस्य च सोऽध्यावर्तनं · तदीजन्नुतिः · जोपस्थितक्रियारहितस्यापि तदभिमतस्यै
वधितव्यमिताद्देवीकस्य स्पष्टत्वमेव । न तु अंहरिणो । वाक्यं तदपि मन्त्रोपस्थदं गर्भितक्रियमिति · गर्भितक्रियं पिण्डीमेस्ये
हापि वाक्यमिति तदर्थः । रहस्यमुपलक्षणं । एवं क्रियावाचकपदात्मकम् अविशेषात् दिवाक्यस्यापि · तदप्युक्तं · आख्यातशब्दे
नियतं साधनं यत्र गम्यते तदप्येकं समासार्थम् वाक्यमित्यभिधीयते इति · एतेन कश्चिदेकपदात्मकवाक्येऽवश्यं नरान्वि
ते शक्तिरिति मीमांसकरीति उराक्रियतेनानेकपदात्मके इति सूचितं । इतरे तात्पर्यं च न्वेयाः नन्वेवं गृहं प्रविशपिंडी
भक्षयेति समुदितप्रयोजनस्यादिति चेन्न · तेषां शब्दान्तरत्व — — लौकिके प्रयोगेऽनाघवानादेनेव प्रयोगसंभवात् · अ
त्र मान्त्वः । भीमसेनाद्यवयवभीमादिपदेन विशिष्टभीमसेनपदस्मरणेन तत्र · मविशेष्यादिवाक्यैकदेशेनापि प्रविशगृह
मिति वाक्यस्मरणेऽसंवाद्याहारं तत्तोबोध इति · तदसमंजसं । बोधदृष्ट्यां स्मरणानुभावात् · इत्यार्थबोधकत्वभावेना

© Dharmartha Trust J&K. Digitized by eGangotri

स॰भू॰टी॰ मानिपदि कात्वा सुबुत्यमना प्रलेश्च । उच्चारितः शब्दः प्रत्यायक इत्युक्तादित्सत्र भाष्यप्रामाण्येन नतोऽवोधात्व॰ एतेन प्र
५४ वेशेत्यादि क्रियादिना कानकाघंध्याहा न इत्सपास्तं । किञ्चाध्याहारः किमाक्षेपोनुमानं वा तत्रापि किं शब्दे न शब्दस्या
क्षेपानुमाने आहोस्विदर्थेन नेनाद्यः । स्वार्थप्रतिपाद

९४. २५५

© Dharmartha Trust J&K. Digitized by eGangotri